* श्रीशिवः *

मैथिलवंशोद्भवमहामहोपाध्याय-

श्रीअमृतनाथ शर्म्मविरचितः

प्रायश्चित्त-व्यवस्थासार-समुच्चयः

मुङ्गेरमण्डलान्तर्गतमहमदाग्रामवास्तव्येन
ठक्कुरोपनामक पं० श्रीकनकलाल शर्म्मणा
मैथिलेनोपयुक्तटिप्पण्या परिष्कृत्य
संशोधितः।

सच

मास्टर खेलाड़ीलाल

महोदयेन प्रकाशितः।

229.5
शर्मा|अ|प्रा

लमावरणपृष्ठं काश्यां श्रीलक्ष्मीनारायण-
समाख्ययन्त्रालये मुद्रितम्।

सर्वाधिकाराः प्रकाशकेन सुरक्षिताः।

शाकः १८४६

उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

पुस्तकालय

परिग्रहण क्रमाङ्क 3797

वर्गाङ्क 229.5

पुस्तकाङ्क थामो।अ।प्रा

* श्रीः *

मैथिलवंशोद्भव-

म० म० श्रीअमृतनाथशर्म्माविरचितः ।

प्रायश्चित्तव्यवस्थासार-

समुच्चयः ।

मुङ्गेरमण्डलान्तर्गत महमदाग्रामवास्तव्येन ठक्कुरोप

नामक पं० श्रीकनकलालशर्म्मणा मैथिलेनोप-

युक्तटिप्पण्या परिष्कृत्य संशोधितः

स च

पुस्तकालय
ग्रन्थ आ० सं० 3197
संस्कृत भवनम्

मास्टर खेलाड़ीलाल महोदयेन

सत्यनाम, यन्त्रालये मुद्रयित्वा प्रकाशितः ।

अस्य सर्वाधिकारः प्रकाशकेन रक्षितः ।

विक्रमाब्दः १९८१

* श्रीः *

भूमिका ।

विदितमेवैतद्भवतां यत् प्रायश्चित्तादिविविधधर्मक्रिया दर्शनाय परमकारुणिका दयासिन्धवो मुनयो मनुयाज्ञवल्क्यप्रभृतयो मनुयाज्ञवल्क्यादिस्मृतिग्रन्थान् प्रणिनिन्युः। परं तषामतिबाहुल्यादतिदुरूहार्थत्वाच्च न तेभ्यः साधारणानां प्रायश्चित्तव्यवस्थाप्रतिपत्तिः सुलभा । प्रायश्चित्तविवेक-प्रायश्चित्तकदम्बादिषु ग्रन्थेषु सत्स्वपि प्रथमस्य विस्तृतत्वात् द्वितीस्य लघुत्वात् सम्यङ् निर्णायकत्वाभावाच्च नैतेभ्योऽपि प्रकृतकार्यसिद्धिसौकर्यमित्यालोच्य महामहोपाध्याय-सच्छास्त्रिक-श्री-अमृतनाथशर्मभि र्महता श्रमेण सारसमुच्चयार्णवान्तर्गतः प्रायश्चित्तव्यवस्थासारसमुच्चयो नाम ग्रन्थो निरमायि। अत्र च नवविधपापविशोधनाय तत्तत्स्मृतिधृतवचनाऽनुगता शुद्धिव्यवस्था सम्यक् दर्शिताऽस्ति। नात्र न कश्चन सन्देहः । प्रशंसनवाक्यं चैतद्ग्रन्थस्याऽस्मृत्कृतमलीकमेव । स्वयमेव ग्रन्थावलोकनेन सौष्ठवासौष्ठवयोः परीक्षणं भविष्यतीत्यलम्पल्लवितेन ।

श्रीकनकलालठक्कुरः ।

व्यवस्थापत्रलेखनप्रकारः प्रदर्श्यते ।

ज्ञानपूर्वकान्त्यावसाय्यन्नाशनशीलो ब्राह्मणश्चान्द्रायणव्रतभागित्यर्थकान्त्यावसायिनामन्नमित्याद्यङ्गिरोवचनात् सकृज्ज्ञानतोऽन्त्यावसाय्यन्नभक्षको ब्राह्मणश्चान्द्रायणव्रतेन शुद्धः । एतद्व्रताकरणेऽष्टधेनुदानेन वा शुद्ध इति वदति-अमुक शर्मा--

एकवर्षगोवधी सान्तपनकृच्छ्रैकचरणप्रायश्चित्तीत्यर्थकैकवर्षे गवि हते कृच्छ्रपादो विधीयत इति वृद्धप्रचेतोवचनादज्ञानतो ब्राह्मणस्वामिकैकहायनगोसाक्षाद्वधी ब्राह्मणः सपादैकादशदिनात्मक कृच्छ्रपादव्रतविधानात् । तदकरणे द्वादशपणदक्षिणाक-षट्पणाधिकषट्कार्षापणदानाद्वा पूतो भवतीति विज्ञायते अमुक शर्म्मा ।

इत्थं रीत्योहेन व्यवस्थापत्रं सर्वत्र लेख्यम् ।

प्रायश्चित्तव्यवस्थासारसमुच्चयस्य विषयाऽनुक्रमणिका ।

	विषयः	पृ०	पं०
१	नवनिधपापानि	१	७
२	प्रायश्चित्तपूर्वदिनकृत्यम्	१	१०
३	केशादिवपनम्	२	१
४	केशादिवपनविचारः	२	३
५	प्राजापत्यव्रतानुकल्पः	३	५
६	धेनुमूल्यविचारः	३	९
७	पञ्चवर्षाभ्यन्तरवयस्कबालस्य प्रा० निषेधः	४	६
८	ब्राह्मणादिजातिविशेषप्रायश्चित्तम्	४	१३
९	ज्ञानाज्ञानयोः प्रायश्चित्तविचारः	४	१७
१०	क्षत्रियादित्रयाणां प्रायश्चित्तविचारः	५	८
११	वृद्धादीनामर्द्धप्रायश्चित्तविचारः	५	१३
१२	अभक्ष्याभक्षण प्रा० व्यवस्था	६	५
१३	अन्त्यावसायिसिद्धान्नभोजने ब्राह्मणस्य प्रा०	६	७
१४	अन्त्यावसायिनिर्णयः	६	१४
१५	अन्त्यावसाय्यसिद्धान्नभोजने ब्रा० प्रा०	७	१२
१६	बलात्सकृदन्त्यावसाय्यसिद्धान्नभोजने ब्रा०	८	४
१७	" "सिद्धान्नभोजने ब्रा०	८	५
१८	अज्ञानतः सकृदन्त्यावसाय्युच्छिष्टभोजने ब्रा०	८	१५
१९	अज्ञानतः सकृच्छौण्डिकसिद्धान्नभोजने ब्रा०	९	७
२०	अज्ञानतः सकृच्छौण्डिकश्वपचान्त्यजासिद्धान्नभोजने		

विषयः	पृ०	पं०
ब्राह्मणस्य	९	११
२१ अन्त्यजनिर्णयः—	१०	५
२२ अज्ञानतः सकृद्रजकाद्यन्त्यजसिद्धान्नभोजने ब्रा०	१०	८
२३ अज्ञानतः सकृच्छौण्डिकान्त्यजोच्छिष्टामान्नभो० ब्रा०	१०	१५
२४ अज्ञानतः सकृच्छौण्डिकोच्छिष्टसिद्धान्नभोजने ब्रा०	११	१०
२५ अन्त्यजोच्छिष्टसिद्धान्नभोजने ब्राह्मणस्य	११	१५
२६ अज्ञानतोऽष्टधा रजकान्त्यजसिद्धान्नभोजने ब्रा०	१२	६
२७ अज्ञानतो नवतिवारान्त्यजसिद्धान्नभोजने ब्रा०	१२	१५
२८ अज्ञानतः सकृच्चाण्डालसम्बन्धिजलपाने ब्रा०	१३	८
२९ अज्ञानतः सकृच्चाण्डालसम्बन्धिजलपाने क्षत्रियादी०	१४	६
३० सकृदज्ञानतश्चाण्डालस्पृष्टजलपाने ब्रा०	१५	१
३१ अज्ञानतः सकृच्चाण्डालस्पृष्टजलपाने क्षत्रियादेः	१५	६
३२ ज्ञानतः सकृच्चांडालस्पृष्टोदकपाने द्विजस्य	१६	३
३३ अज्ञानतः सकृच्चाण्डालोच्छिष्टजलपाने ब्रा०	१६	९
३४ " ,, क्षत्रियादेः	१७	३
३५ सकृदज्ञानतो म्लेच्छादिसम्बन्धिजानुदघ्नन्यून पुष्करिण्यादिजलपाने ब्रा०	१७	१७
३६ सकृदज्ञानतश्चाण्डालभाण्डस्थजलपाने द्विजस्य	१८	१०
३७ अज्ञानाभ्यासतश्चाण्डालकूपस्थजलपाने ब्रा०	१८	१६
३८ अज्ञानतः सकृदन्त्यजसम्बन्धिजलपाने ब्रा०	१९	९
३९ अज्ञानतः सकृदन्त्यजसम्बन्धिजलपाने क्षत्रियादेः	२०	१
४० सकृदज्ञानतः शौण्डिकान्त्यजादिभाण्डस्थजलादि पाने द्विजस्य	२०	१०
४१ सकृदज्ञानतोऽन्त्यजादिखानिततडागादिजलपाने ब्रा.	२१	५

विषयः	पृ०	पं०
४२ विष्ठामूत्रसंस्पृष्टकूपजलपाने व्रा०	२१	१२
४३ अज्ञानतः सकृदन्त्यजोच्छिष्टजलपाने व्रा०	२२	४
४४ „ „ क्षत्रियादेः	२२	१०
४५ अज्ञानतः सकृत्तैलिकामान्नभक्षणे व्रा०	२३	६
४६ ज्ञानतः सकृत्तैलिकसिद्धान्नभोजने प्रतिग्रहे च व्रा०	२३	१३
४७ अज्ञानतः सकृत्तैलिकसिद्धान्नभोजने व्रा०	२४	२
४८ „ „ क्षत्रियादेः	२५	१
४९ ज्ञानाभ्यासेन तैलिकसिद्धान्नभोजने प्रतिग्रहे चव्रा०	२५	१३
५० अज्ञानतः सकृत्तैलिकोच्छिष्टामान्नभोजने व्रा०	२६	६
५१ “ “ क्षत्रियादेः	२७	२
५२ अज्ञानतः सकृत्तैलिकोच्छिष्टसिद्धान्नभोजने व्रा०	२७	१५
५३ “ “ क्षत्रियादेः	२८	८
५४ ज्ञानाभ्यासेन तैलिकोच्छिष्टसिद्धान्नभोजने तैलिक-प्रतिग्रहणे च	२९	४
५५ अज्ञानतो नवतिवारतैलिकसिद्धान्नभोजने ब्राह्मणस्य	२९	११
५६ सकृदज्ञानतस्तैलिकजलपाने ब्राह्मणस्य	३०	१०
५७ अज्ञानतः सकृत्तैलिकोच्छिष्टजलपाने ब्राह्मणादीनाम्	३१	४
५८ यवनादिसिद्धान्नभोजने जलपाने च चतुर्णाम्	३१	१५
५९ सकृदज्ञानतः शूद्रसिद्धान्नभोजने व्रा०	३२	३
६० अज्ञानाभ्यासेन शूद्रसिद्धान्नभोजने व्रा०	३२	१०
६१ सकृदज्ञानतः शूद्रस्पृष्टान्नभोजने व्रा०	३३	६
६२ सकृदज्ञानतः शूद्रोच्छिष्टामान्नभोजने व्रा०	३४	१
६३ “ “ सिद्धान्नभोजने व्रा०	३४	११

विषयः	पृ०	पं०
६४ सकृदज्ञानतःशूद्रसम्बन्धिशूद्रभाण्डस्थजलपाने ब्रा०	३५	४
६५ " " शूद्रोच्छिष्टजलपाने ब्रा०	३६	४
६६ " " पतितसिद्धान्नभोजने ब्रा०	३६	६
६७ अज्ञानतः सकृत्पतितामान्नभोजने ब्रा०	३७	२
६८ सकृदज्ञानतः पतितस्पृष्टसिद्धान्नभोजने क्षत्रियादेः	३८	१
६९ " " आमान्नभोजने ब्रा०	३८	११
७० अज्ञानतः सकृत्पतितोदकपाने ब्रा०	३९	६
७१ सकृदज्ञानतश्चतुर्थपञ्चमनवमैकादशरिन-श्राद्धान्नभोजने ब्रा०	३९	११
७२ ज्ञानतः सकृत्सुराभाण्डस्थजलपाने ब्रा०	४१	१६
७३ अज्ञानतः " "	४२	३
७४ गोहतादिशवस्पर्शे तदर्थाश्रुपाते च चतुर्णाम्	४३	७
७५ अथ व्यभिचारे व्यवस्था	४३	१४
७६ अज्ञानतस्तु क्षत्रियादित्रयाणां ब्राह्मणीगमने	४४	६
७७ नाट्यादिगमने प्रायश्चित्तम्	४५	३
७८ ज्ञानतः सकदन्त्यजादिस्त्रीगमने	४६	८
७९ ज्ञानतो द्विरभ्यासादन्त्यजस्त्रीगमने	४६	१६
८० अज्ञानतश्चतुर्विंशतिधाऽन्त्यजस्त्रीगमने ब्रा०	४७	६
८१ ज्ञानतः सकृत् शौण्डिकस्त्रीगमने ब्राह्मणस्या	४७	१४
८२ " "क्षत्रियस्य-	४८	७
८३ अज्ञानतः सकृत्तैलिकस्त्रीगमने	४९	१
८४ अज्ञानतः सकृच्चाण्डालीगमने ब्रा०	५०	१
८५ " "म्लेच्छस्त्रीगमने चतुर्णाम्-	५०	१०
८६ " "पतितप्रतिग्रहे	५१	११

विषयः	पृ०	पं०
८७ " " अन्त्यजचाण्डालप्रतिग्रहे	५२	३
८८ शौण्डिकप्रतिग्रहे	५३	७
८९ " " शूद्रप्रतिग्रहे ब्राह्मणस्य-	५३	१२
९० ज्ञानाभ्यासेन,, ,,	५४	६
९१ गोमांसभक्षण प्रा० व्यवस्था-	५४	१०
९२ ज्ञानाभ्यासेन गोमांसभक्षणे	५५	६
९३ सकृदज्ञानतो गोमांसभक्षणे शूद्रस्य	५६	१४
९४ चिरतरकालाभ्यासेनाश्वादिमांसभक्षणे ब्रा०	५७	६
९५ सकृदज्ञानतोऽश्वादिमांसभक्षणे ब्रा०	५८	७
९६ सकृज्ज्ञानतो ग्राम्यवराहमांसभक्षणे ब्रा०	५८	१२
९७ सकृदज्ञानतो रेतोमूत्रपुरीषभक्षणे ब्रा०	५९	७
९८ ,, ,, ज्ञानतः ,, ,,	५९	१४
९९ सकृदज्ञानतः कलविंकादिभोजने ब्रा०	६०	१२
१०० कामतोऽत्यन्ताभ्यासेन कलविंकादिभोजने ब्रा०	६१	६
१०१ अभक्ष्यमांसविशेषभक्षणे ब्रा०	६१	१३
१०२ उपपातक माह	६३	१०
१०३ उपपातकेषु गोवधप्रा० व्यवस्था	६५	६
१०४ ब्रा० स्वामिक गोवधे ब्रा०	६५	७
१०५ ,, ,, क्षत्रियस्य	६६	७
१०६ ,, ,, वैश्यस्य	६७	८
१०७ ,, ,, शूद्रस्य	६८	३
१०८ क्षत्रियस्वामिकैकहायनादि गो० व० ब्रा०	६९	१
१०९ ,, ,, क्षत्रियस्य	६९	९
११० ,, ,, वैश्यस्य	७०	४

विषयः	पृ०	पं०
१११ ,, ,, शूद्रस्य	७०	१२
११२ वैश्यस्वामिकैकहायनादि गोवधे ब्रा०	७१	६
११३ ,, ,, क्षत्रियस्य	७१	१३
११४ ,, ,, वैश्यस्य	७२	९
११५ ,, ,, शूद्रस्य	७३	१
११६ शूद्रस्वामिकैकहायनादिगोवधे त्रयाणाम्	७३	६
११७ ,, ,, शूद्रस्य	७४	१
११८ एकप्रयत्नजनितेत्यादि गोवधे ब्रा०	७४	८
११९ तादृशगोवधे क्षत्रियस्य	७६	५
१२० ,, ,, वैश्यस्य	७६	१२
१२१ ,, ,, शूद्रस्य	७७	१
१२२ एकप्रयत्नजनितेत्यादि गोवधे ब्रा०	७७	८
१२३ ,, ,, क्षत्रियादेः	७७	१०
१२४ वैश्यस्वामिकबह्वेकहायनादिगोवधे ब्रा०	७८	१
१२५ एकप्रयत्नजनितेत्यादिगोवधे द्विजस्य	७८	८
१२६ ब्रा० स्वा० ए० हा० गोवधकर्तृबहुब्राह्मणानाम्	७८	१७
१२७ " "गोद्वय " "	७९	१०
१२८ ब्रा० स्वा० चतुर्हायनादिगोवधे ब्रा० क्ष०	८०	७
१२९ ,, ,, वैश्यस्य	८४	१
१३० क्षत्रिय ,, ,, ब्रा०	८४	१०
१३१ ,, ,, क्ष०	८५	३
१३२ वैश्यस्वा ,, ,, ब्रा०	८६	४
१३३ शूद्रस्वा ,, ,, त्रयाणाम्-	८७	५
१३४ साक्षाद्गोवधप्रकारमाह ,,	८८	१

विषयः	पृ०	पं०
१३५ शूद्रप्रज्वालिताग्निना ब्रा० स्त्रा० गोवधे प्रज्वालकशू०	८९	५
१३६ ,, ,, क्ष० ,,	८९	१४
१३७ वैश्यस्त्रा० एकहायनादिगोरग्निना बधे प्र० शू०	९०	७
१३८ शूद्रस्त्रा ,, ,,	९१	१
१३९ ब्रा० स्त्रा० चतुर्हायनादि ,, ,,	९१	७
१४० क्ष० स्त्रा० ,, ,,	९१	१४
१४१ वैश्यस्त्रा ,, ,,	९२	४
१४२ शूद्रस्त्रा ,, ,,	९२	९
१४३ ब्रा० स्त्रा० गर्भिण्यादिगोबधे ब्रा०	९३	४
१४४ ,, ,, क्षत्रिय०	९४	१
१४५ क्ष० स्त्रा० गर्भिण्यादिगोलधे ब्रा० ,,	९४	९
१४६ वैश्यस्त्रा० ,, ,,	९५	७
१४७ शूद्रस्त्रा० ,, ,,	९६	५
१४८ उत्पन्नमात्र ब्रा० स्त्रा० गोगर्भबधे ब्रा०	९७	२
१४९ ,, ,, क्षत्रि०	९८	१
१५० ,, ,, वैश्यस्य	९८	८
१५१ ,, ,, शूद्रस्य	९८	१५
१५२ उत्पन्नमात्र क्ष० स्त्रा० ,, ,, ब्रा०	९९	४
१५३ ,, ,, वै० स्त्रा० ,, ब्रा०	१००	७
१५४ ,, ,, शू० स्त्रा० ,, ,, द्विजस्य	१०१	४
१५५ ब्रा० स्त्रा० अतिवृद्धादिगोबधे ब्राह्मणस्य	१०१	१६
१५६ क्ष० स्त्रा० ,, ,,	१०३	३
१५७ वै० स्त्रा ,, ,,	१०३	९
१५८ शूद्रस्त्रा० ,, ,, द्विजस्य	१०३	१६

विषया	पृ०	पं०
१५९ ब्रा० स्वा० एकाधिकचतुर्हायनादि गोवधे ब्रा०	१०४	८
१६० क्ष० स्वा० ,, ,,	१०५	५
१६१ वै० स्वा० ,, ,,	१०५	११
१६२ शू० स्वा० ,, ,,	१०६	७
१६३ अस्थ्याङ्गूलादिभंगानन्तरं षण्मासपर्यन्तं गोर्जीवेनऽस्थिलांगूलादिभङ्गकर्तृब्राह्मणादिचतुर्णाम्	१०७	९
१६४ अस्थिभंगान्तरं षण्मासाभ्यन्तरे गोमरणे	१०८	१
१६५ वृषाण्डच्छेदनकर्तुर्ब्राह्मणस्य	१०८	१५
१६६ हलादिशकटादिना स्वयं वृषवाहकब्राह्मणस्य	१०९	१२
१६७ ज्ञानतो हलादावुत्सृष्टवृषयोजकस्य ब्राह्मणस्य	११०	५
१६८ यवनादौ गोविक्रये विनिमये च विक्रयविनिमय-कर्तुः	१११	५
(अथ रोधादिनिमित्तकप्रायश्चित्तम्)		
१६९ रोधने गोमरणे रोधनकर्तुः	११२	६
१७० अयथावन्धने अकालबन्धने च गोमरणे बन्धनकर्तुः	११२	७
१७१ हलादियोजनेऽतिवाहादिना गोमरणे हलादियोजकस्य	११२	९
१७२ दण्डविशेषनिपातने गोमरणे दण्डनिपातनकर्तुः	११२	११
१७३ धर्मार्थातिरिक्तकूपखाताद्निपातादिना गोमरणे तत्कूपखातादिकर्तुः	११२	१२
१७४ दण्डप्रमाणमाह	११३	१
१७५ रात्रौ संयमनार्थं रोधे यथावन्धने च गोमरणे	११५	२
१७६ यथावन्धनमाह व्यासः	११५	७
१७७ अपालननिमित्तकप्रायश्चित्तम्	११६	२
१७८ द्विजस्वामिकगोरपालनान्मरणे	११७	६

विषयः	पृ०	पं०
१७९ शूद्रस्वामिकगोरपालनान्मरणे	११८	८
१८० उत्सृष्टवत्सतरीवृष्योरपालनान्मरणे	११९	६
१८१ एकाधिकगोरपालनान्मरणे	११९	११
१८२ बहुकर्तृकैकाधिकगोरपालनान्मरणे	११९	१४
१८३ म्लेच्छपालकरणे प्रायश्चित्तम्	११९	१६
१८४ अशक्तपालकेऽपालनाद्गोमरणे	१२०	१८
१८५ एकहायनादिगोरपालनान्मरणे	१२०	७
१८६ लतादिनिबन्धदण्डादिदोषेण गोमरणे	१२१	१
१८७ धर्मार्थं कूपखातादौ गोमरणे	१२१	१२
१८८ मशकादिनिवारणार्थं प्रज्वालिताग्निना गृहदाहादिना वा बन्धनरहितगोमरणे	१२१	१३
१८९ पूर्वव्याधियुतगोर्दण्डाद्यभिघातेन मरणे	१२२	९
१९० गोर्यन्त्रणे चिकित्सायामन्तर्मृतगर्भनिष्काशने च गोमरणे	१२३	७
१९१ गोहितार्थं लौहादिना दाहादौ कृते गोमरणे	१२४	४
१९२ गव्याधिविनाशार्थं विहितपरिमितौषधदाने गोमरणे	१२५	१२
१९३ गव्युपकारार्थं स्वल्पतैललवणखलिदाने गोमरणे	१२५	३
१९४ देवालयखते सीमनः खनते च गोमरणे	१२५	१२
१९५ गोमैथुने गोमरणे	१२५	१३
१९६ श्राद्धादौ त्रिशूलचक्रादिनांकनकरणे	१२६	६
१९७ निवार्यंतं स्वामिनं पालकं वातिक्रम्य गर्तकान्तारादौ गोमरणे	११६	१२
१९८ शंकारहितस्थाने गोमरणे	१२७	३
१९९ बन्धनशून्यगोर्वज्रादिना कथंचिन्मरणे	१२७	७
२०० गृहपतनातिवृष्ट्यादिनाबंधनशैथ्य गोमरणे	१२८	१

विषयः	पृ०	पं०
२०१ अथ व्रात्यम्	१२८	६

विषयः	पृ०	पं०
२०२ अथ तत्रव्यवस्था	१२९	७
२०३ आलस्यादिना व्रात्यताशालिद्विजस्य	१२९	१४
२०४ देशोपप्लवादिना व्रात्यताशालिद्विजस्य	१३०	३
२०५ सहोदरे ज्येष्ठेऽविवाहिते कनिष्ठविवाहे	१३१	१
२०६ वैमात्रेयदत्तकादेर्भ्रातुः कनिष्ठविवाहे	१३२	५
२०७ देशान्तरगतज्येष्ठप्रतीक्षाकालमाह	१३३	११
२०८ निरग्नेर्यस्य मरणभ्रान्त्या दाहादिप्रेतकार्यं कृतम्	१३४	५
२०९ अविवाहिते ज्येष्ठे सन्न्यासयुक्तेकनिष्ठविवाहे	१३४	१२
२१० ज्येष्ठभगिन्या अविवाहे सोदरकनिष्ठ भगिनीविवाहे	१३५	५
२११ अथ गोगमने व्यवस्था	१३६	३
२१२ गोगमने रेतः सेकात्पूर्वं ब्राह्मणस्य	१३७	४
२१३ ज्ञानतो जातिभ्रंकरकर्मकर्तुर्ब्राह्मणस्य	१३७	१३
२१४ जातिभ्रंशकराण्याह	१३८	३
२१५ रूक्षः कृत्यायां विशेषमाह	१३८	९
२१६ संकरीकरणमाह	१३९	५
२१७ अपात्रीकरणमाह	१३९	५
२१८ अथ प्रकीर्णम्	१४०	५
२१९ महापातकमाह	१४१	१६
२२० ब्राह्मणस्य सर्वमद्यपाने	१४३	५
२२१ अतिपातकान्याह	१४४	१
२२२ अनुपातकमाह	१४४	४
२२३ ब्रह्मस्वाभिकस्वर्णस्तेये ब्राह्मणादीनाम्	१४४	१४
२२४ क्षत्रियादिस्वाभिकहिरण्यस्तेये	१४६	५
२२५ अथ वधे विचारः	१४७	८
२२६ अथ संसर्गिणः	१४८	९

॥ श्रीगणेशाय नमः ॥

अथ

प्रायश्चित्तव्यवस्थासारसमुच्चयः।

गणेशो गिरिजाजातो दन्तीवलमुखो हि यः।
विघ्नविच्छेदकुशलो विघ्ननाशाय सोस्तु मे ॥
नन्दनन्दनमाराध्य गुरुमिष्टं च देवताम्।
क्रियतेमृतनाथेन प्रायश्चित्तव्यवस्थितिः ॥

तत्र प्रायश्चित्तं पापनाशकक्रियाविशेषः। तत्र पापानि नवविधानि—

जातिभ्रंशकरसङ्करीकरणापात्रीकरणमलावहप्रकीर्णोपपातकानुपातकमहापातकातिपातकानि। तेषां प्रायश्चित्तमग्रे वक्ष्यते—

(अथ प्रायश्चित्तपूर्वदिनकृत्यम्)

प्रायश्चित्तपूर्वदिने केशादीन् वाप्य स्नात्वा सायं घृतं प्राश्य उत्तरदिने स्नात्वा प्रायश्चित्तं करणीयम्। तथाहि शङ्खः—

वाप्य केशनखान् पूर्वं घृतं प्राश्य वहिर्निशि ।
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ॥

(अथ केशादिवपनविचारः)

एकपादप्रायश्चित्ते नखकेशच्छेदनं, द्विपादे श्मश्रुच्छेदनमपि, त्रिपादे शिखावर्जं सर्वकेशच्छेदनं चतुष्पादे सशिखवपनम् । तथाहि संवर्तः—

नखानां छेदनं पादे द्विपादे श्मश्रुणः स्मृतम् ।
त्रिपादे तु शिखावर्जं सशिखन्तु ततः परम् ॥

केशधारणे द्विगुणं प्रायश्चित्तम् । तथाहि हारीतः—

केशानां धारणार्थं तु द्विगुणं व्रतमाचरेत् ।
द्विगुणे तु व्रते चीर्णे द्विगुणा दक्षिणा भवेत् ॥

स्त्रियास्तु विधवाया अङ्गुलिद्वयकेशच्छेदनमात्रं न तु सर्वकेशमुण्डनम् । तथाहि पराशरः—

वपनं नैव नारीणां नाऽनुव्रज्याजपादिकम् ।
न गोष्ठे शयनं तासां न ता दध्युर्गवाजिनम् ॥
सर्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम् ।
सर्वत्रैव हि नारीणां शिरसो मुण्डनं स्मृतम् ॥

*सधवायास्तु कुत्रापि न केशवापनम् । तदुक्तं पारिजाते–

सधवानां तु नारीणामलङ्काराय सर्वदा ।
केशसंधारणं प्रोक्तं प्रायश्चित्ते द्विजोत्तमैः ॥

(अथ प्राजापत्यव्रतानुकल्पः)

प्राजापत्यव्रताकरणे आह संवर्त्तः–

†प्राजापत्यव्रताशक्तौ धेनुं दद्यात्पयस्विनीम् ।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥

(अथ धेनुमूल्यविचारः)

धेनुमूल्यमाह षट्त्रिंशन्मतम् । तथाहि–

धेनुः पञ्चभिराढ्यानां मध्यानां त्रिपुराणिका ।
कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता ॥

पञ्चभिरिति कार्षापणैरिति शेषः । आढ्यो महाधनः । कार्षापणः षोडश पणाः । पुराणं कार्षापणम् ।

---

* विद्यमानपतिकायाः स्त्रियो न कुत्रचिदपि देशे शिरो वापनं (मुण्डनं) प्रसिद्धमित्यर्थः ।

†प्राजापत्यलक्षणन्तु–

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।
त्र्यहं परञ्च नाश्नीयात्प्राजापत्यमिति स्मृतम् ॥

अत्र कात्यायनः—

द्वात्रिंशत्पणिका गावो वत्सः पौराणिको भवेत्। तेन वत्समूल्यं पुराणमेकं गोमूल्यं कार्षापणद्वयं तेन मिलित्वा धेनुमूल्यं कार्षापणत्रयं सवत्साया गोर्धेनुत्वात्।

(अथ पञ्चवर्षाभ्यन्तरवयस्कबालस्य प्रायश्चित्तनिषेधः)

पञ्चवर्षाभ्यन्तरवयस्कबालस्य सुरापानभिन्नेषु सर्वपापेषु न प्रायश्चित्तम्।

ततो न्यूनतरस्यास्य नापराधो न पातकम्।
नचास्य राजदण्डोस्ति प्रायश्चित्तं न विद्यते॥

इत्यङ्गिरोवचनात्। ततः पञ्चवर्षात्प्राक् सुरापाने तु तस्यापि प्रायश्चित्तमेव। तथाहि सनत्कुमारः—

ब्राह्मणैस्तु सुरापानं न कर्तव्यं कदाचन॥

सुरापाननिषेधोयं जात्याश्रयपरः, जात्याश्रयपरो ब्राह्मणत्वजात्याश्रयपरः तेन पञ्चवर्षाभ्यन्तरवयसो ब्राह्मणस्यापि सुरापानं निषेधः।

(अथ ज्ञानाज्ञानयोः प्रायश्चित्तविचारः)

अज्ञानतो यत्र यस्य यत्प्रायश्चित्तं ज्ञाने तत्र तस्य

तत् द्विगुणम्। तथाहि अङ्गिराः—

स्यादकामकृते यत्तद् द्विगुणं बुद्धिपूर्वके।

ज्ञाने यत्र यत्प्रायश्चित्तमज्ञाने तत्र तदर्द्धं प्रायश्चित्तं वक्ष्यमाणविश्वामित्रवचने तथा दृष्टत्वात्। तथाहि—

* कृच्छ्रांस्तु चतुरः कुर्याद गोवधे बुद्धिपूर्वके।
अमत्या तु द्वयं कार्यमिति।

(अथ क्षत्रियादित्रयाणां प्रायश्चित्तविचारः)

ब्राह्मणप्रायश्चित्तात्क्षत्रियादीनां त्रयाणां क्रमेण पादपादन्यूनं प्रायश्चित्तम्। तथाहि बृहद्विष्णुः—

विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम्।
वैश्येर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते॥

(अथ वृद्धादीनामर्द्धप्रायश्चित्तविचारः)

वृद्धादीनामर्द्धं प्रायश्चित्तं तथाहि विष्णुपुराणे—

अशीतिर्यस्य वर्षाणि बालो वाऽप्यूनषोडशः।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च॥

---

* कृच्छ्रव्रतलक्षणमाह मनुः—

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्॥ इति॥

ऊनषोडशः पञ्चवर्षाभ्यन्तरवयस्कः । एतच्च—दशवर्षादूर्ध्वं । दशवर्षाऽभ्यन्तरे पादमात्रप्रायश्चित्ताभिधानात् । तथाहि विष्णुपुराणे—

पादो वाजेषु दातव्यः सर्ववर्णेष्वयं विधिः ।

(अथाऽभक्ष्यभक्षणप्रायश्चित्तव्यवस्थायामन्त्यावसायिसिद्धान्नभोक्तृब्राह्मणस्य प्रायश्चित्तविचारः)

सकृत् ज्ञानतोन्त्यावसायिसिद्धान्नभोजनकर्तुर्ब्राह्मणस्य * चान्द्रायणं प्रायश्चित्तम्, अज्ञानतस्तप्तकृच्छ्रं प्रायश्चित्तम् ।

अन्त्यावसायिनामन्नमश्नीयाद्यस्तु कामतः ।
स तु चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा ॥

इत्यङ्गिरोवचनात् । अत्र चान्द्रायणेष्टौ धेनवः, तप्तकृच्छ्रे चतस्रः । क्षत्रियादीनां पादपादहानिः ।

(अन्त्यावसायिनिर्णयः)

अन्त्यावसायिनस्तु—

चाण्डालः श्वपचः क्षत्ता सूतो वैदेहिकस्तथा ।

---

* चान्द्रायणव्रतलक्षणं मनुराह—

एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ।
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥

मागधायोगवौ चेति सप्तैतेन्त्यावसायिनः ॥

ब्राह्मण्यां शूद्राज्जातः चाण्डालः। क्षत्तुरुग्रायां जातः श्वपचः। उग्रा च शूद्रायां क्षत्रियाज्जाता शूद्राक्षत्रिययोरुग्रा, इत्यमरकोशात्।

मनुरप्याह—

क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्।
क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते ॥

क्षत्रियायां शूद्राज्जातः क्षत्ता। ब्राह्मण्यां क्षत्रियाज्जातः सूतः। ब्राह्मण्यां वैश्याज्जातो वैदेहिकः। क्षत्रियायां वैश्याज्जातो मागधः। वैश्यायां शूद्राज्जात आयोगवः।

(अन्त्यावसाय्यसिद्धान्नभोक्तृब्राह्मणप्रायश्चित्तविचारः)

ज्ञानतः सकृदन्त्यावसाय्यसिद्धान्नभोजने ब्राह्मणस्य चान्द्रायणतुरीयभागं प्रायश्चित्तम्।

अन्त्यावसायिनामन्नमश्नीयाद्यस्तु कामतः।
स तु चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा।

पादमामान्नभोजने, इति—शुष्कान्नभोजने पादम्, इत्यङ्गिर आपस्तम्बमनुवचनेभ्यः। अज्ञानेभ्य तदर्द्धम्।

अत्रापि क्षत्रियादीनां पादपादहानिः ।

विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥

बलात्सकृदन्त्यावसाय्यसिद्धान्नभोजने ब्राह्मणस्य त्रिरात्रव्रतम् । सिद्धान्नभोजने*पराकं प्रायश्चित्तम् ।

तथा च विष्णुवचनम्—

चाण्डालाद्यन्नं भुक्त्वा त्रिरात्रमुपवसेत् ।
सिद्धं भुक्त्वा पराकं कुर्यादिति ।

त्रिरात्रव्रते सपादधेनुमूल्यं पराके च पञ्चधेनवः । क्षत्रियादीनां पादपादहीनम् ।

विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥

इत्यादिवचनात् । ज्ञानाभ्यासे चान्द्रायणाभ्यासः, अज्ञानाभ्यासे तदर्द्धाभ्यासः ॥

अज्ञानतः सकृदन्त्यावसाय्युच्छिष्टसिद्धान्नभो-

---

* पराकव्रतलक्षणमुक्तं मनुना—

यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः ॥

जने ब्राह्मणस्य *चान्द्रायणं ज्ञाने चान्द्रायणद्वयं प्रायश्चित्तम् ।

अन्त्यानां भुक्तशेषन्तु भक्षयित्वा द्विजातयः ।
चान्द्रं कृच्छ्रं तदर्द्धञ्च ब्रह्मक्षत्रविशां विधिः ॥

इत्यापस्तम्बवचनात् । चान्द्रायणेष्टौ धेनवः । आमान्ने तुरीयांशः ।

अज्ञानतः सकृच्छौण्डिकसिद्धान्नभोजनकर्तुर्ब्राह्मणस्य मासव्रतं प्रायश्चित्तम् ।

शौण्डिकान्नं सूतकान्नं भुक्त्वा मासं व्रती भवेत् ।
इति शङ्खवचनात् । मासव्रते धेनुद्वयम् ।

अज्ञानतः सकृच्छौण्डिकश्वपचान्त्यजासिद्धान्नभोजने ब्राह्मणस्य त्र्यहोपवासः प्रायश्चित्तम् ।

श्वपचां शौण्डिकानां च †चैलनिर्नेजकस्य च।

---

*चान्द्रायणलक्षणमुक्तं प्राक् ।

† चेलनिर्नेजकस्येति । निर्नितरां नेनेक्ती तीति निर्नेजकः चेलानां निर्नेजकः चेलनिर्नेजकस्तस्य वस्त्रप्रक्षालकस्येत्यर्थः रजकस्येति यावत् । चेलशब्दोवस्त्रवाचकः ॥

इत्यादिमनुवचनात्। त्र्यहोपवासे अर्द्धधेनुमूल्यम्। ज्ञाने तादृशासिद्धान्नभोजने प्राजापत्यम्।

स्यादकामकृतें यत्तद्द्विगुणं बुद्धिपूर्वके।

इत्यङ्गिरोवचनात्। क्षत्रियादीनां पादपादहीनं तत्तदेव।

अन्त्यजानाह यमः—

रजकश्चर्मकारश्च नटो बुरुड एव च।
कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः॥

अज्ञानतः सकृदजकाद्यन्त्यजसिद्धान्नभोजने ब्राह्मणस्य मासव्रतं प्रायश्चित्तम्। शौण्डिकान्त्यजयोरामान्नभोजने मनुना समानप्रायश्चित्तोपदेशेन 'बहूनामेकधर्माणामि'ति बौधायनवचनेन सर्वत्र तुल्यप्रायश्चित्तोपगमात्। 'शौण्डिकान्नं सूतकान्नमि'त्यादि शङ्खवचनात्तथा पर्यवसानात्। मासव्रते धेनुद्वयम्।

अज्ञानतः सकृच्छौण्डिकान्त्यजोच्छिष्टाऽऽमान्नभोजने ब्राह्मणस्य षडुपवासः प्रायश्चित्तम्।

श्वपचां शौण्डिकानां च चेलनिर्नेजकस्य च ।
इत्यादि मनुवचन 'सर्वत्रानुच्छिष्टादुच्छिष्टे द्वैगुण्य-
मि'ति शूलपाणिलिखनाभ्याम् । षडुपवासे धेनुरेका ।
ज्ञानतो द्वैगुण्यं प्रायश्चित्तम् । तदुक्तमङ्गिरसा—

स्यादकामकृते यत्तद् द्विगुणं बुद्धिपूर्वके ।
इति । क्षत्रियादीनां पादपादहीनं तत्तदेव ।

विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥

इत्यादिबृहद्विष्णोर्वचनात् ।

अज्ञानतः सकृच्छौण्डिकोच्छिष्टसिद्धान्नभोजने
ब्राह्मणस्य मासद्वयं प्रायश्चित्तम् । शौण्डिकान्न-
सूतकान्नमित्यादि शंखवचनात्, सर्वत्रानुच्छिष्टादु-
च्छिष्टे द्वैगुण्यमिति शूलपाणिलिखनाच्च । मासद्वय
व्रते धेनुचतुष्टयम् ॥

अन्त्यजोच्छिष्टसिद्धान्नभोजने ब्राह्मणस्य मा-
सद्वयं प्रायश्चित्तम् । तदाहुः शंखबौधायनशूलपाणयः

शौण्डिकान्नं सूतकान्नं भुक्त्वा मासं व्रती भवेत् ।
बहूनामेकधर्माणां प्रायश्चित्तं समं स्मृतम् ।
सर्वत्रानुच्छिष्टादुच्छिष्टे द्वैगुण्यमि'ति;

अत्र धेनुचतुष्टयम् । अभ्यासे तु सर्वत्र प्रायश्चित्तावृत्तिः । क्षत्रियादीनां पादपादहीनं तत्तदेव ॥

अज्ञानतोऽष्टधा रजकाद्यन्त्यजसिद्धान्नभोजनकर्तुं ब्राह्मणस्य चान्द्रायणद्वयम् । ज्ञानतस्तादृशभोजनकर्तुः कृच्छ्राब्दं प्रायश्चित्तम् ।

अन्त्यजानभिधाय—

एतेषां तु स्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥

इति यमवचनात् । कृच्छ्राब्दे त्रिंशद्धेनवः । ऐन्दवद्वयं चान्द्रायणद्वयं तत्र पञ्चदश धेनवः । क्षत्रियादीनां पादपादहानिरिति शूलपाणिः ।

अज्ञानतो नवतिवारान्त्यजसिद्धान्नभोजने ब्राह्मणस्य द्वादशवार्षिकं प्रायश्चित्तम् ।

अन्त्यजानभिधाय–

एतेषां तु स्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति॥

इति यमवचनात्। "पातित्याच्च द्वादशवार्षिकप्रायश्चित्तार्हते"ति स्मार्तलिखनाच्च। द्वादशवार्षिके प्रायश्चित्ते साशीतिपयस्विधेनुशतदानम् (१८०)॥ ज्ञानतस्तु कृतेऽपि प्रायश्चित्तेऽव्यवहार्यतेति स्मार्ताः॥

अज्ञानतः सकृच्चाण्डालसम्बन्धिजलपाने ब्राह्मणस्य *सान्तपनं षड्रात्रोपवासपूर्वकपञ्चगव्यपानं च प्रायश्चित्तम्।

चाण्डालस्य तु पानीयं ब्राह्मणस्तु यदा पिबेत्।
†षड्रात्रोपोषितो भूत्वा पञ्चगव्येन शुद्ध्यति॥

---

* सान्तपनलक्षणं यथा –

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्॥ इति

† षड्रात्रोपोषित इति। षण्णां रात्रीणां समाहारः षड्रात्रम्। षड्रात्रमुपोषितः षड्रात्रोपोषितः। षड्रात्रं यावत् कृतोपवास इत्यर्थः।

इति हारीतवचनात्। अनुत्तारिते तु सान्तपनमधिकमिति निबन्धव्याख्यानाच्च। *उत्तारिते तु सान्तपनशून्यं सर्वमेव। सान्तपने एककार्षापणम्। षड्रात्रोपवासे धेनुरेका। पञ्चगव्यपाने तु अर्द्धधेनुः। ज्ञानतो द्वैगुण्यम्॥

अज्ञानतः सकृच्चाण्डालसम्बन्धिजलपानकर्तुः क्षत्रियस्य पादहीनं सान्तपनं सार्द्धचतुष्टयदिनव्रतं पञ्चगव्यपानं च। वैश्यस्यार्द्धसान्तपनं त्रिरात्रोपवासः पञ्चगव्यपानञ्च। शूद्रस्य सान्तपनपादं सार्द्धदिनोपवासः पञ्चगव्यपानञ्च प्रायश्चित्तम्।

चाण्डालस्य तु पानीयं ब्राह्मणस्तु यदा पिबेत्।
षड्रात्रोपोषितो भूत्वा पञ्चगव्येन शुद्ध्यति॥
विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम्।
वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते॥

इति हारीतविष्णुवचनाभ्याम्। उत्तारिते तु सान्तपनशून्यं सर्वं पूर्ववत्॥

* उत्तारित इति। कृपादुद्धृत इत्यर्थः।

सकृदज्ञानतश्चाण्डालस्पृष्टजलपानकर्तुर्ब्राह्मणस्य सान्तपनं कृच्छ्रं प्रायश्चित्तम् ।

यस्तु चाण्डालसंस्पृष्टं पिबेत्तोयमकामतः ।
स तु सान्तपनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मनः ॥

इत्यङ्गिरोवचनात् ॥

अज्ञानतः सकृच्चाण्डालस्पृष्टजलपाने क्षत्रियस्य पादोनसान्तपनम् । वैश्यस्य सान्तपनार्द्धम् । शूद्रस्य सान्तपनपादं प्रायश्चित्तम् ।

यस्तु चाण्डालसंस्पृष्टं पिबेत्तोयमकामतः ।
स तु सान्तपनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मनः ॥
विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥

इत्यङ्गिरोबृहद्विष्णुवचनाभ्याम् । सान्तपने एक कार्षापणम् । क्षीरादिपानेप्येतदेव प्रायश्चित्तम् ।

यस्तु चाण्डालसंस्पृष्टं पिबेत्किञ्चिदकामतः ।
स तु सान्तपनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मनः ।

इत्यङ्गिरोवचनात् । किञ्चिदिति जलक्षीरादिकमिति शूलपाणिः ॥

ज्ञानतः सकृच्चाण्डालस्पृष्टोदकपानकर्तुर्द्विजस्य त्रिरात्रोपवासपूर्वकपञ्चगव्यपानं प्रायश्चित्तम् ।

चाण्डालेन तु संस्पृष्टा आपो यः पिवति द्विजः ।
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥

इत्यापस्तम्बवचनात् । त्रिरात्रोपवासे सार्धधेनुः । पञ्चगव्यपानेऽर्द्धधेनुः । मिलित्वा धेनुद्वयम् ॥

अज्ञानतः सकृच्चाण्डालोच्छिष्टजलपाने ब्राह्मणस्य सान्तपनद्वयं द्वादशरात्रोपवासः। पञ्चगव्यपानं च प्रायश्चित्तम् ॥

चाण्डालस्य तु पानीयं ब्राह्मणस्तु यदा पिवेत् ।
षड्रात्रोपोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥

इति हारीतवचनात् । 'सर्वत्रानुच्छिष्टादुच्छिष्टे द्वैगुण्यमि'ति शूलपाणिलिखनाच्च ॥ सान्तपनद्वये कार्षापणद्वयम् । द्वादशरात्रोपवासे धेनुद्वयम् पञ्च-

गव्यपानेऽत्र धेनुरेका । मिलित्वा (११) एकादश-कार्षापणाः ॥

अज्ञानतः सकृत् चाण्डालोच्छिष्टजलपाने क्षत्रियस्य पादोनसान्तपनद्वयं, नवरात्रोपवासः, पञ्चगव्यपानं च प्रायश्चित्तम् । वैश्यस्य सान्तपनं षड्रात्रोपवासः, पञ्चगव्यपानं च प्रायश्चित्तम् । शूद्रस्य सान्तपनार्द्धं, त्रिरात्रोपवासः, पञ्चगव्यपानं च प्रायश्चित्तम् ।

हा चाण्डालस्य तु पानीयं ब्राह्मणस्तु यदा पिवेत् ।
री- षड्रात्रोपोषितो भूत्वा पञ्चगव्येन शुद्धयति ॥
वृ विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वि- वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥
शू- सर्वत्रानुच्छिष्टादुच्छिष्टे द्वैगुण्यं प्रायश्चित्तम् ।

इति हारीत–वृद्धविष्णु–शूलपाणिवचनेभ्यः । तेन क्षत्रियस्य कार्षापणाष्टकं सपादम् । वैश्यस्य सार्द्ध-पञ्च कार्षापणाः । शूद्रस्य कार्षापणत्रयं पादोनम् ॥

सकृदज्ञानतो म्लेच्छादिसम्बन्धिजानुदघ्नन्यून

पुष्करिण्यादिजलपाने ब्राह्मणस्य नक्तव्रतं प्रायश्चित्तम्। तज्जलमभिधाय—

तत्तोयं यः पिबेद्विप्रः कामतोकामतोपि वा।
अकामान्नक्तभोजी स्यादहोरात्रं तु कामतः॥

इत्यापस्तम्बवचनात्। नक्तव्रते माषपरिमितशौप्यदानम्। जानुदघ्नोर्द्ध्वजले न दोषः।

म्लेच्छादीनां जलं पेयं पुष्करिण्यां ह्रदेऽपि वा।
जानुदघ्नं शुचि ज्ञेयं तदधस्त्वशुचि स्मृतम्॥

इत्यापस्तम्बवचनात्।

सकृदज्ञानतश्चाण्डालभाण्डस्थजलपाने द्विजस्य त्रिरात्रव्रतम्, शूद्रस्यैकाहोरात्रव्रतं प्रायश्चित्तम्।

यस्तु चाण्डालभाण्डस्थमज्ञानादुदकं पिबेत्।
स तु त्र्यहेण शुद्ध्येत शूद्रस्त्वेकेन शुध्यति॥

इति देवलवचनात्। त्रिरात्रव्रते चतुर्विंशतिपणाः। अहोरात्रेऽष्टौ पणाः॥

अज्ञानाभ्यासतश्चाण्डालकूपस्थजलपाने ब्राह्मणस्य

सान्तपनम् । क्षत्रियस्य प्राजापत्यम् । वैश्यस्य प्राजापत्यार्द्धम् । शूद्रस्य प्राजापत्यपादं प्रायश्चित्तम् ।

चाण्डालकूपभाण्डेषु यस्त्वज्ञानाज्जलं पिबेत् ।
प्रायश्चित्तं कथं तत्र वर्णे वर्णे विधीयते ॥
चरेत्सान्तपनो विप्रः प्राजापत्यं तु भूमिपः ।
तदर्द्धं तु चरेद्वैश्यः पादं शूद्रस्य निर्दिशेत् ॥

इत्यापस्तम्बवचनात् । सान्तपनमत्र सप्ताहसाध्यं तत्र धेनुद्वयम्, प्राजापत्ये च धेनुरेका ॥

अज्ञानतः सकृदन्त्यजसम्बन्धिजलपाने ब्राह्मणस्य त्रिरात्रोपवासपूर्वकपञ्चगव्यपानं प्रायश्चित्तम् ।

अज्ञानाच्चेत्पिबेत्तोयं ब्राह्मणोऽन्त्यस्थजातितः ।
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति ॥

इत्यापस्तम्बवचनात् । त्रिरात्रव्रते सार्द्धकार्षापणम् । ज्ञानतो द्वैगुण्यम् । तत्र—

स्यादकामकृते यत्तद्द्विगुणं बुद्धिपूर्वके ।
इत्यङ्गिरोवचनमधिकं हेतौ ॥

अज्ञानतः सकृदन्त्यजसम्बन्धिजलपाने क्षत्रियस्य पादोनत्रिरात्रव्रतम्। वैश्यस्य सार्द्धदिनव्रतम्। शूद्रस्य त्रिरात्रपादव्रतं प्रायश्चित्तम्।

आ अज्ञानाच्चेत्पिबेत्तोयं ब्राह्मणोऽन्त्यस्थजातितः।
प- त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति॥
वृ विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम्।
वि- वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते॥

इत्यापस्तम्ब-बृहद्विष्णुवचनाभ्याम्। ज्ञानतो द्वैगुण्यम्। अभ्यासे प्रायश्चित्तावृत्तिः॥

सकृदज्ञानतः शौण्डिकाऽन्त्यजादिभाण्डस्थजलादिपाने द्विजस्य *ब्रह्मकूर्चोपवासः। शूद्रस्यैकोपवासपूर्वकयथाशक्ति दानं प्रायश्चित्तम्।

भाण्डस्थितमभोज्यनामपो दधि पयः पिबेत्।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः॥

---

* ब्रह्मकूर्चव्रतलक्षणं प्रायश्चित्तविवेके—
अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः।
पंचगव्यं पिबेत्प्रात र्ब्रह्मकूर्चविधिः स्मृतः॥ इति

ब्रह्मकूर्चोपवासेन द्विजातीनां तु निष्कृतिः ।
शूद्रस्य तूपवासेन दद्याद्दानं तु शक्तितः ॥

इति पराशरवचनात् । ब्रह्मकूर्चोपवासे एककार्षापणम् ॥

सकृदज्ञानतोऽन्त्यजखानिततडागादिजलपाने ब्राह्मणस्यैकोपवासपूर्वकपञ्चगव्यपानं प्रायश्चित्तम् ।

आ अन्त्यजैः खानिताः कूपास्तडागानि तथैव च ।
प- एषु स्नात्वा च पीत्वा च पञ्चगव्येन शुध्यति ॥
शू- "पञ्चगव्यपानमुपवासपूर्वकं प्रायश्चित्तम्" ।

इत्यापस्तम्बवचनशूलपाणिलिखनाभ्याम् । एकोपवासेऽष्टौ पणाः ॥

विष्ठामूत्रसंस्पृष्टकूपजलपाने ब्राह्मणस्य त्रिरात्रं कुम्भजलपाने सान्तपनं प्रायश्चित्तम् ।

कूपे विण्मूत्रसंस्पृष्टे पीत्वा तोयं द्विजोत्तमः ।
त्रिरात्र्येण विशुद्ध्येत्तु कुम्भे सान्तपनं चरेत् ॥

इत्यार्षवचनात् । त्रिरात्रेऽर्धधेनुः । सान्तपने धेनुद्वय

मिति भवदेवः । पादोनधेनुचतुष्टयमिति शूलपाणिः । इदमज्ञाने । ज्ञाने तु तद् द्विगुणम् । क्षत्रियादीनां पादपादहानिः ॥

अज्ञानतः सकृदन्त्यजोच्छिष्टजलपाने ब्राह्मणस्य षड्रात्रोपवासपूर्वकपञ्चगव्यपानं प्रायश्चित्तम् ।

अज्ञानाच्चेत्पिबेत्तोयं ब्राह्मणोऽन्त्यस्थजातितः ।
सर्वत्रानुच्छिष्टादुच्छिष्टे द्वैगुण्यं प्रायश्चित्तम् ॥

इत्याद्यापस्तम्बवचन–शूलपाणिलिखनाभ्याम् । षड्रात्रे कर्षापणत्रयम् ॥

अज्ञानतः सकृदन्त्यजोच्छिष्टजलपाने क्षत्रियस्य सार्द्धदिनचतुष्टयव्रतम् । वैश्यस्य त्रिरात्रव्रतम् । शूद्रस्य सार्द्धदिनव्रतं प्रायश्चित्तम् ।

आ- अज्ञानाच्चेत्पिबेत्तोयं ब्राह्मणोऽन्त्यस्थजातितः ।
वृ विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वि- वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥
शू- "सर्वत्रानुच्छिष्टादुच्छिष्टे द्वैगुण्यं प्रायश्चित्तम्"
इत्याद्यापस्तम्ब-बृहद्विष्णु-शूलपाणिवचनेभ्यः ।

शौंडिकोच्छिष्टजलपाने तत्पुष्करिण्यादिजलपाने यत्र विशेषतः प्रायश्चित्तन्नोक्तं तत्र सर्वत्रान्त्यजोच्छिष्टादिजलपानवदेव प्रायश्चित्तम्। अन्त्यजवदेव व्यवस्थापत्रमूहेन लेख्यम्। तत्र 'बहूनामेकधर्माणामित्यादिबौधायनवचनं हेतावधिकम्। अन्यत्समानमिति॥

अज्ञानतः सकृत्तैलिकामान्नभक्षणे ब्राह्मणस्य त्रिरात्रव्रतं पञ्चगव्यपानं प्रायश्चित्तम्। चाक्रिकलौहकारतक्षकामान्नभोजने त्रिरात्रमुपवसेत्।

गोमूत्रं गोमयं चाश्नीयादिति हारीतोक्तेः।

चाक्रिको वृषचक्रेण तैलनिष्पादक इति शूलपाणिः। गोमूत्रगोमयपदे पञ्चगव्योपलक्षके। त्रिरात्रव्रते सार्द्धकार्षापणम्। क्षत्रियादीनां पादपादहानिः।

ज्ञानतः सकृत्तैलिकासिद्धान्नभोजने प्रतिग्रहे च ब्राह्मणस्य प्राजापत्यं प्रायश्चित्तम्।

तैलिकादीनभिधाय—

तेषां वै ब्राह्मणो भुक्त्वा कृत्वा चैव प्रतिग्रहम्।
प्राजापत्येन शुद्ध्येत्त ततः पापान्न संशयः॥

इत्यापस्तम्बवचनात् । प्राजापत्ये धेनुरेका ॥

अज्ञानतः सकृत्तैलिकसिद्धान्नभोजने ब्राह्मणस्य मासव्रतं प्रायश्चित्तम् ।

शौंडिकाः कांडिकाः *षण्ढा अभोज्यान्नाः प्रकीर्त्तिताः ।
चक्रोपजीवी रजकः कितवस्तस्करस्तथा ।

इत्यादियमवचनेन तैलिकशौण्डिकयोरेकत्र साम्याभिधाने—

वौ बहूनामेकधर्माणा मेकस्यापि यदुच्यते ।
धा- सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृताः ॥
शं- शौण्डिकान्नं †सूतिकान्नं भुक्त्वा मासं व्रती भवेत्

इत्यादिवौधायन—शंखवचनाभ्यां तथा पर्यवसानात् मासव्रते धेनुद्वयम् । ज्ञानतो द्वैगुण्यम् *अभ्यासे प्रायश्चित्तावृत्तिः ।

---

* षण्डा इति । स्त्री पुंव्यंजनरहिता इत्यर्थः । यथा देवलः षण्डको लिङ्गहीनः स्यात्संस्कारानर्हकश्च सः ।

†सूतिकान्नमिति । सूतिकोद्देशेन शौचिभिरपि यत्कृतमित्यर्थः ।

* अभ्यास इति । पुनः पुनस्तैलिकसिद्धान्नभोजन इत्यर्थः ।

सकृदज्ञानतस्तैलिकसिद्धान्नभोजने क्षत्रियस्य *पादोनमासव्रतम् । वैश्यस्यार्द्धमासव्रतम् । शूद्रस्य सार्द्धसप्तदिनव्रतं प्रायश्चित्तम् । तदाहु र्यमवौधायन-शङ्खाः—

य.-शौण्किकाः काण्डिकाः षण्डा अभोज्यान्नाः प्रकीर्तिताः ।
वौ-बहूनामेकधर्माणां मेकस्यापि यदुच्यते ।
धा.-सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृताः ॥
शं.-शौण्डिकान्नं सूतकान्नं भुक्त्वा मासं व्रती भवेत् ।

वृहद्विष्णुश्चाह—

विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥ इति ।

ज्ञानतो द्वैगुण्यम् ।

ज्ञानाभ्यासेन तैलिकसिद्धान्नभोजनप्रतिग्रहयो र्ब्राह्मणस्य चान्द्रायणं प्रायश्चित्तम् । तैलिकादीनभिधाय—

* सार्द्धद्वाविंशतिदिनव्रतमित्यर्थः ।

*तदन्नाशनशीलस्तु तथा तस्य प्रतिग्रही ।
चरेच्चान्द्रायणं विप्रः ज्ञानाभ्यासेन शुद्धये ॥

इति सुमन्तुवचनात् । एतत् ज्ञानाभ्यास इति शूलपाणिलिखनाच्च । चान्द्रायणे सार्धसप्तधेनुमूल्यसार्द्धद्वाविंशतिकार्षापणम् । अज्ञानाभ्यासे चान्द्रायणार्द्धं तत्र प्रागुक्तसुमन्तुवचनम्, अज्ञानाभ्यासे तदर्द्धमिति शूलपाणिलिखनं च हेतुः । क्षत्रियादीनां पादपादहीनमेतदेव ॥

अज्ञानतः सकृत्तैलिकोच्छिष्टामान्नभोजने ब्राह्मणस्य षड्रात्रव्रतपूर्वकं पञ्चगव्यपानं प्रायश्चित्तम् । तैलिकाद्यभिधानपूर्वकमाहु र्मनुहारितशूलपाणयः—

म—भुक्त्वा चान्यतमस्यान्नममत्या क्षपणं त्र्यहम् ।
नु.मत्या भुक्त्वा चरेत्कृच्छ्रं रेतोविण्मूत्रभक्षणे ॥
हा.—"पञ्चगव्यं चाश्नीयात्"

शू.—अनुच्छिष्टत उच्छिष्टे सर्वत्र द्विगुणं व्रतम् ।

* अयं सुमन्तुवचनानुवादः । तद्वचनस्वरूपंतु—तदन्नाशनप्रतिग्रहयोश्चान्द्रायणं चरेदिति ।

षड्रात्रव्रते कार्षापणत्रयम् ॥

अज्ञानतः सकृत्तैलिकोच्छिष्टमान्नभोजने क्षत्रियस्य सार्द्धदिनचतुष्टयव्रतम् । वैश्यस्य त्रिरात्रव्रतम्। शूद्रस्य सार्द्धदिनव्रतं पञ्चगव्यपानं च प्रायश्चित्तम् । तदाहुस्तैलिकाद्यभिधानपूर्वकं मनु–बृहद्विष्णु–शूलपाणयः––

म.–भुक्त्वा चान्यतमस्यान्नममत्या क्षपणं त्र्यहम् ।
मत्या भुक्त्वा चरेत्कृच्छ्रं रेतोविण्मूत्रभक्षणे ॥
बृ- विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वि- वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥
शू.- अनुच्छिष्टत उच्छिष्टे सर्वत्र द्विगुणं व्रतम् ।

सार्द्धदिनचतुष्टयव्रते पादोनं कार्षापणत्रयम् । त्रिरात्रव्रते सार्द्धकार्षापणम् । सार्द्धदिनव्रते द्वादश पणाः ।

अज्ञानतः सकृत्तैलिकोच्छिष्टसिद्धान्नभोजने ब्राह्मणस्य द्विमासव्रतं प्रायश्चित्तम् ।

आ-शौण्डिकाः कांडिकाः षंढा अभोज्यान्नाः प्रकीर्त्तिताः।

प—चक्रोपजीवी रजकः कितवस्तस्करस्तथा ।
वौ—बहूनामेकधर्माणामेकस्यापि यदुच्यते ।
धा—सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृताः ॥
शं—शौण्डिकान्नं सूतकान्नं भुक्त्वा मासं व्रती भवेत् ।

इत्याद्यापस्तम्ब—वौधायन—शङ्खवचनेभ्यः ।

अनुच्छिष्टत उच्छिष्टे सर्वत्र द्विगुणं व्रतम् ।

इति शूलपाणिलिखनाच्च । द्विमासव्रते धेनुचतुष्टयम् ॥

अज्ञानतः सकृत्तैलिकोच्छिष्टसिद्धान्नभोजने क्षत्रियस्य सार्द्धमासिकव्रतं प्रायश्चित्तम् । वैश्यस्य मासव्रतम् । शूद्रस्यार्द्धमासव्रतं प्रायश्चित्तम् ।

आ.-शौंडिकाः कांडिकाः षंढा अभोज्यान्नाः प्रकीर्तिताः ।
वौ.-बहूनामेकधर्माणामेकस्यापि यदुच्यते ।
धा.-सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृताः ॥
शं.-शौंडिकान्नं सूतकान्नं भुक्त्वा मासं व्रती भवेत् ।
वृ-विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वि.-वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥

इत्याद्यापस्तम्बवौधायन-शङ्ख-वृहद्विष्णुवचनेभ्यः। सार्धमासिकव्रते धेनुत्रयं, मासव्रते धेनुद्वयं, अर्द्धमासव्रते एकधेनुः। ज्ञानतो द्वैगुण्यम्॥

ज्ञानाभ्यासेन तैलिकोच्छिष्टसिद्धान्नभोजने तैलिकप्रतिग्रहे च ब्राह्मणस्य चान्द्रायणं प्रायश्चित्तम्। तैलिकादीनभिधायेदं सुमन्तुवचनम्—

तदन्नाशनशीलस्तु तथा तस्य प्रतिग्रही।
चरेच्चान्द्रायणं विप्रः ज्ञानाभ्यासेन शुद्धयें

चान्द्रायणे सार्द्धसप्त धेनवः। अज्ञानाभ्यासे तदर्द्धम्। क्षत्रियादीनां पादपादहानिः॥

अज्ञानतो नवतिवारतैलिकसिद्धान्नभोजने ब्राह्मणस्य द्वादशवार्षिकं प्रायश्चित्तम्। तदुक्तमापस्तम्बवौधायनयमैः—

आ-चक्रोपजीवी रजकः कितवस्तस्करस्तथा।
वौ- बहूनामेकधर्माणामेकस्यापि यदुच्यते।
धा. सर्वेषामेव तत्कुर्यादेकरुपा हि ते स्मृताः॥

रजकादीनभिधाय—

य- एतेषां तु स्त्रियोगत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥

द्वादशवार्षिके प्रायश्चित्ते साशीतिपयस्विशतधेनुः—(१८०) ज्ञानतस्तु कृतेऽपि प्रायश्चित्तेऽव्यवहार्यतेति स्मार्त्ताः। क्षत्रियादीनां पादपादहानिः ॥

अज्ञानतोऽष्टधा तैलिकसिद्धान्नभोजनेऽन्त्यजसिद्धान्नभोजनवद्व्यवस्था। तत्र बहूनामित्यादि वौधायनवचनमधिकं हेतावन्यत्समानम् ॥

सकृदज्ञानतस्तैलिकजलपाने ब्राह्मणस्यत्रिरात्रोपवासपूर्वकं पञ्चगव्यपानं प्रायश्चित्तम्। तदुक्तमापस्तम्ब-वौधायन-यमैः—

आ—अज्ञानाच्चेत्पिबेत्तोयं ब्राह्मणोऽन्त्यस्थजातितः।
प०—त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुद्धयति ॥
वौ—बहूनामेकधर्माणां मेकस्यापि यदुच्यते।
य—चक्रोपजीवी रजकः कितवस्तस्करतथा।
इत्यादि। त्रिरात्रव्रते सार्द्धकार्षापणदानम्। क्षत्रि

यादीनामन्त्यजलपानवदेव व्यवस्था। तत्र बहूनामित्यादि वचनमधिकं हेतावन्यत्समानम्। अभ्यासे प्रायश्चित्तावृत्तिः॥

अज्ञानतः सकृत्तैलिकोच्छिष्टजलपाने ब्राह्मणादिचतुर्णामन्त्यजोच्छिष्टजलपानवदेव व्यवस्था।

'चक्रोपजीवीरजक' इत्यादि, 'बहूनामि' त्यादचापस्तम्बवौधायनवचने हेतावधिकेऽन्यत्समानम्॥

तन्तुवायजलान्नभोजने शौण्डिकवदेव व्यस्थाव।

गान्धर्वो लौहकारश्च शौण्डिकस्तन्तुवायकः।
चक्रोपजीवी रजकः कितवस्तस्करस्तथा।
ध्वजी मालोपजीवी चेत्यादि निषादोनसमाःस्मृताः,

इत्यादियमवचनेन तयोः समत्वे सिद्धे 'वहूनामेकधर्माणामि' त्यादि वौधायनवचनेन तथा पर्यवसानात्। ध्वजी शौण्डिकः॥ ❀॥

यवनादिसिद्धान्नभोनें जलपानें च चाण्डालान्त्यावसायिसिद्धासिद्धान्नभोजनजलपानवदेव प्रायश्चित्तम्।

तत्र 'चाण्डालयवनयोः साम्यमि' ति स्मार्त्तलिखनमधिकं हेतावन्यत्समानम् ॥ ❀ ॥

सकृदज्ञानतः शूद्रसिद्धान्नभोजने ब्राह्मणस्य त्रिरात्रोपवासः । सकृत् ज्ञानतः शूद्रसिद्धान्नभोजने प्राजापत्यं प्रायश्चित्तम् । शूद्रादीनभिधाय मनुराह—

भुक्त्वा चान्यतमस्यान्नममत्या क्षपणं त्र्यहम् ।
मत्या भुक्त्वा चरेत्कृच्छ्रं रेतोविण्मूत्रभक्षणे ॥

त्रिरात्रोपवासे सार्द्धकार्षापणम् । क्षत्रियादीनां पादपादहीनम् ॥

अज्ञानाभ्यासेन शूद्रसिद्धान्नभोजने ब्राह्मणस्यैकधेनुदानं ज्ञानाभ्यासेन धेनुद्वयदानं प्रायश्चित्तम् । तदुक्तं शङ्खलिखिताभ्याम्—

श- शूद्रान्नं ब्राह्मणो भुक्त्वा तथा *रङ्गावतारिणः ।
ङ् चिकित्सकस्य क्षुद्रस्य तथा स्त्रीमृगजीविनः ॥

---

* रङ्गावतारिणः ; नृत्यस्थाने गीतवाद्यादिना तदनुगुणतथा प्रसक्तिन इत्यर्थः । चिकित्सकस्य वैद्यस्य ।

स्तः षण्डस्य कुलटायाश्च तथा बन्धनचारिणः ।
०— वद्धस्य चैव चोरस्य अबीरायाः स्त्रियस्तथा ॥
आ- शूद्रस्यान्नमथर्त्वान्नं भुक्त्वा दद्यात्पयस्विनीम् ।
प- इदमज्ञानतो ज्ञाने देयं धेनुद्वयं तथा ॥

क्षत्रियादीनां पादपादहीनम् ।

सकृदज्ञानतः शूद्रस्पृष्टान्नभोजने ब्राह्मणस्यैकोपवासः प्रायश्चित्तम् । तदाह जावालिः—

* केशकीटावपन्नं च स्त्रीभिः स्पृष्टं तथैव च ।
† श्वोदक्या शूद्रसंस्पृष्टं पञ्चगव्येन शुद्ध्यति ॥ इति शूलपाणिः—

पञ्चगव्यपानं व्रतरूपं तेन दिनैकोपवासः पर्यवस्यतीति ।

एकोपवासेऽष्टौ पणाः । स्त्रीपदं शूद्रस्त्रीपरं ब्राह्मण्यादिनिषेधवैयर्थ्यादिति शूलपाणिः । ज्ञानतो द्वैगुण्यम् । अभ्यासे प्रायश्चित्तावृत्तिः ॥

* केशकीटावपन्नमिति । केशकीटैः सह पक्वमित्यर्थः ।
† श्वोदक्येति । श्वा कुक्कुरः । उदक्या चतुर्थदिनस्नाता स्त्री ।

सकृदज्ञानतः शूद्रोच्छिष्टामान्नभोजने ब्राह्मणस्य त्रिरात्रव्रतम् । ज्ञानतः सकृच्छूद्रोच्छिष्टामान्नभक्षणे षड्रात्रोपवासः प्रायश्चित्तम् । तदुक्तं लघ्वापस्तम्ब-शङ्खाभ्याम्—

ल-आ.अज्ञानाद्यस्तु भुञ्जीत शूद्रोच्छिष्टं द्विजोत्तमः ।
प-त्रिरात्रमुपवसेज्ज्ञाने षड्रात्रव्रतमाचरेत् ॥ इति ॥
शं—*सुराभाण्डपयःपाने शूद्रोच्छिष्टस्य भोजनें ।
खः—षड्रात्रमुपवासश्च प्रायश्चित्तमिति स्मृतम्॥ इति॥

त्रिरात्रे सार्द्धकार्षापणम् । षड्रात्रे कार्षापणत्रयम् । क्षत्रियादीनां पादपादहीनम् ॥

सकृदज्ञानतः शूद्रोच्छिष्टसिद्धान्नभोजनकर्तुर्ब्राह्मणस्य षड्रात्रव्रतं ज्ञानतस्तादृशान्नभोजने च प्राजापत्यद्वयं प्रायश्चित्तम् । तदुक्तं मनुशूलपाणिभ्याम्—

मनुः—भुक्त्वाचान्य तमस्यान्नममत्या क्षपणं त्र्यहम् ।

---

* सुराभाण्डेति । एष च श्लोकः शंखलिखितानुवादः, तत्रत्य-प्रमाणात्मकग्रन्थस्वरूपन्तु शूद्रोच्छिष्टभोजने सुराभाण्डोदकपाने च षड्रात्रमिति । अस्य ज्ञाने इति शेषो बोध्यः । एतावताऽज्ञाने तदर्द्धं त्रिरात्रव्रतमिति फलितम् ।

मत्या भुक्त्वा चरेत्कृच्छ्रं रेतोविण्मूत्रभक्षणे ॥

शूल* अनुच्छिष्टत उच्छिष्टे सर्वत्र द्विगुणं व्रतम् ।
इति ।

सकृत् ज्ञानतः शूद्रसम्बन्धिशूद्रभाण्डस्थजलपाने ब्राह्मणस्य पुराणमेकं प्रायश्चित्तम् । तदाह शातातपः—

यदि विप्रः प्रमादेन शूद्रतोयं पिबेत् सकृत् । इति ॥
प्रायश्चित्तं कथं तत्र येन शुद्धिमवाप्नुयात् ।
उपोष्य बिल्वपद्मानां पलाशस्य कुशस्य च ।
एतेषामुदकं पीत्वा तेन शुद्धि र्भविष्यति ॥

शूलपाणिः—

†शूद्रभाण्डपयः पाने पुराणैकं प्रकीर्त्तितम् । इति ॥
अज्ञानतोऽर्द्धं प्रायश्चित्तम् । अभ्यासे प्रायश्चित्तावृत्तिः ॥

क्षत्रविट्शूद्रनवभाण्डस्थजलपाने ब्राह्मणस्य न दो

*अनुच्छिष्टेति । एषोऽर्द्धश्लोक शूलपाण्युक्तानुवादः तद्ग्रन्थस्वरूपं तु—सर्वत्रानुच्छिष्टादुच्छिष्टे द्वैगुण्यमिति ।

† अयमपि तथैव शूलपाणिग्रन्थस्तु-अत्र पुराणमेकं देयमिति ।

षः । तथाहि शातातपः—

नवभाण्डेषु पानीयं शूद्रविट्क्षत्रजन्मनाम् ।
पेयं तदपि विप्राणां पयो दधि तथैव च ॥ इति ।

सकृदज्ञानतः शूद्रोच्छिष्टजलपाने ब्राह्मणस्य कार्षापणद्वयं प्रायश्चित्तम् । तदाह शातातपः—

यदि विप्रः प्रमादेन शूद्रतोयं पिवेत्सकृत्
शूलपाणिः—

अनुच्छिष्टत उच्छिष्टे सर्वत्र द्विगुणं व्रतम् ।

सकृदज्ञानतः पतितसिद्धान्नभोजने ब्राह्मणस्य धेनुद्वयदानरूपं प्रायश्चित्तम् ।

पतितान्नं तु यो भुङ्क्ते सप्ताहमुदके वसत् ।
इत्यादिप्रचेतोवचनात् ।

शूलपाणिः—

* सप्ताहोदकवासे तु दद्यात् धेनुद्वयं द्विजः ।

* अयमर्द्धश्लोकः शूलपाणिग्रन्थानुवादः, तदुक्तिस्तु सप्ताहोदकवासे धेनुद्वयमिति ।

ज्ञानतो द्वैगुण्यं प्रायश्चित्तम् ॥

अज्ञानतः सकृत्पतितामान्नभोजने ब्राह्मणस्यार्द्धधेनुमूल्यं प्रायश्चित्तम्। तदाह प्रचेताः—

पतितान्नं तु यो भुङ्क्ते सप्ताहमुदके वसेत्। इति शङ्खः—

शुष्कान्नभोजने पादं पादमामान्नभोजने।

सकृदज्ञानतः पतितस्पृष्टसिद्धान्नभोजने ब्राह्मणस्य प्राजापत्यं प्रायश्चित्तम्।

तदाह शङ्खः—

*चाण्डालपतितामेध्यैः कुणिभिः कुष्ठिभिस्तथा।
रजस्वलाऽवधूताभ्यां पुष्कसैश्च तथा पुनः ॥
स्पृष्टमन्नं तु यो भुङ्क्ते स कृच्छ्रव्रतमाचरेत् ॥

* अयं शंखोक्तेः पद्यात्मकोऽनुवादः। तदुक्तिस्तु गद्यम् तद्य— अमेध्यचाण्डालपतितपुष्कसरजस्वलावधूतकुणिकुष्ठिस्पृष्टानि भुक्त्वा कृच्छ्रं चरेदिति। अमेध्यं मद्यभाण्डादि, पुष्कसः क्षत्रियायां शूद्राज्जातः। स्वभावतः पाणिविकलः कुणिः। कृच्छ्रं प्राजापत्यं इति तदर्थः। रजस्वलावधूताभ्यामिति। रजस्वला ऋतुमती। अवधूतो राज्ञा देशाद्बहिष्कृतस्ताभ्यामित्यर्थः।

सकृदज्ञानतः पतितस्पृष्टसिद्धान्नभोजने क्षत्रियस्य पादोनप्राजापत्यं वैश्यस्यार्द्धप्राजापत्यं शूद्रस्य प्राजापत्यपादं प्रायश्चित्तम् ।

तदुक्तं शङ्खेन—

चाण्डालपतितामेध्यैः कुणिभिः कुष्ठिभिस्तथा ।
रजस्वलावधूताभ्यां पुष्कसैश्च तथा पुनः ।
स्पृष्टमन्नं तु यो भुङ्क्ते स कृच्छ्रव्रतमाचरेत् ॥

इति बृहद्विष्णुनाऽप्युक्तम्—

विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥ इति

सकृदज्ञानतः पतितस्पृष्टामान्नभोजने ब्राह्मणस्य प्राजापत्यपादं प्रायश्चित्तम् ॥

तदाह शङ्खः—

चाण्डालपतितामेध्यैः कुणिभिः कुष्ठिभिस्तथा ।
रजस्वलाऽवधूताभ्यां पुष्कसैश्च तथा पुनः ।
स्पृष्टमन्नं तु यो भुंक्ते स कृच्छ्रव्रतमाचरेत् ॥ इति

आपस्तम्बः—

*भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समादिशेत्।
अर्द्धोच्छिष्टे स्मृतः पादः पादमामान्नभोजने ॥ इति प्राजापत्यपादे द्वादश पणाः। ज्ञानतः सर्वत्र द्वैगुण्यम्। क्षत्रियादीनां पादपादहानिः।

अज्ञानतः सकृत् पतितोदकपाने ब्राह्मणस्य त्र्यहं कुशोदकपानरूपं प्रायश्चित्तम्। तदाह प्रचेताः—

पतितान्नं तु यो भुंक्ते सप्ताहमुदकेवसेत्।
पानीयपानतश्चैव कुशवारि पिवेत्त्र्यहम् ॥

त्र्यहकुशोदकपाने—.....

सकृदज्ञानतश्चतुर्थपञ्चमनवमैकादशादिनश्राद्धान्नभोने ब्राह्मणस्य चान्द्रायणम्। प्रथममासिकान्नभोजने † पराकः। द्वितीयमासिकादिषण्मासि-

* भुक्तमुच्छिष्टं येन स भुक्तोच्छिष्टः, उच्छिष्टभोक्तेत्यर्थः। अन्त्य जैः स्पृष्टः, अन्त्यजस्पृष्टान्नभोक्तेत्यर्थः। प्राजापत्यं व्रतं समादिशेत् कुर्यात्। अर्द्धोच्छिष्टे। उच्छिष्टस्याऽर्द्धमर्द्धोच्छिष्टं तस्मिन्। उच्छिष्टस्यार्द्ध भोजने कृते सतीत्यर्थः। आमान्नभोजनेऽसिद्धान्नभोजने ॥

† पराकव्रतलक्षणमाह मनुः—
यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्।
पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः ॥

कादिपर्यन्तान्नभोजने प्राजापत्यम् । त्रैपाक्षिकान्नभोजने *अतिकृच्छ्रम् । षण्मासादूर्द्ध्वं प्रथमाब्दिकान्नभोजने प्राजापत्यपादः । द्वितीयतृतीयाब्दिकान्नभोजने एकाहव्रतं प्रायश्चित्तम् ।

तदाह शङ्खः—

चान्द्रायणं नवश्राद्धे पराको मासिको मतः ।
†पक्षत्रयेऽतिकृच्छ्रं स्यात्षण्मासे कृच्छ्र एव च ।
आब्दिके‡ कृच्छ्रपादः स्यादेकाहः पुनराब्दिके॥

---

* अतिकृच्छ्रलक्षणमाह मनुः—

एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत् ।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः ।

† अतिकृच्छ्रव्रतलक्षणमाह याज्ञवल्क्यः—

यथा कथंचित्त्रि गुणः प्राजापत्योऽयमुच्यते ।
एष एवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजने ॥ इति ।

मनूक्तलक्षणं तु—

एकैकं ग्रासम श्नीयात्त्र्यहाणि त्रीणि पूर्ववत् ।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः ॥

‡ कृच्छ्रपादलक्षणमाह याज्ञवल्क्यः—

एकभुक्तेन नक्तेन तथैवायाचितेन च ।
उपपासेन चैकेन कृच्छ्रपादः प्रकीर्तितः ॥ इति ।

चान्द्रायणे सार्द्धसप्त धेनवः । पराके पञ्च धेनवः । अतिकृच्छ्रे धेनुत्रयम् । कृच्छ्रपादे द्वादश पणाः । एकाहे रूप्यरक्तिकाषट्कम् ॥

नवश्राद्धमाह शूलपाणिः—

चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥ इति

मासिके प्रथममासिके, पक्षत्रये त्रैपक्षिके, षण्मासे द्वितीयमासिकादिषण्मासिकपर्यन्ते, आब्दिके प्रथमवार्षिके, पुनराब्दिके द्वितीयतृतीयाब्दिके । चतुर्थाद्याब्दिकेत्वन्नभोजने न दोषः ।

तथाहि स्मृतिः—

सपिण्डीकरणादूर्द्ध्वं यावदब्दत्रयं भवेत् ।
तावदेव न भोक्तव्य श्राद्धीयान्नं क्वचेऽहनि ॥
प्रथमाब्दे तु मांसानि द्वितीयेऽस्थीनि चैव हि ।
तृतीये रुधिरं भुक्तं चतुर्थेऽन्नं विशुद्धयति ॥

ज्ञानतः सकृत्सुराभाण्डस्थजलपाने ब्राह्मणस्य पञ्चव्रतं प्रायश्चित्तम् ।

अपः सुराभाजनस्थाः पीत्वा पक्षं व्रती भवेत् ।

इति मनुवचनात् । पक्षव्रतेऽत्र धेनुरेका ।

अज्ञानतः सकृत्सुराभाण्डस्थजलपाने ब्राह्मणस्य सार्द्धकार्षापणदानम्प्रायश्चित्तम् । तथाहि मनुः—

अपः सुराभाजनस्था मद्यभाण्डस्थितास्तथा ।
पञ्चरात्रं पिबेत्पीत्वा शङ्खपुष्पीश्रृतं पयः ॥

क्षत्रियादीनां पादपादहानिः । अन्नविकारो मदहेतुः । सुरागौडीखार्जूरतालादिमद्यपाने क्षत्रियादे र्दोषाभावादेव तत्तन्मद्यभाण्डस्थजलपाने दोषाभावः । तथा हि—

कामादपि हि राजन्यो वैश्यो वापि कथञ्चन ।
मद्यमेवं तथा पीत्वा न दोषं प्रतिपद्यते ॥

शूद्रस्य सर्वमद्यपाने दोषभावः । सुतरां तद्भाण्डस्थजलपाने *सः ।

गोहतविप्रहतात्मघातिनां दहनवहनादिकर्तुः क-

* स इति । दोषाभाव इत्यर्थः ।

टोदककियापूर्वकतप्तकृच्छ्रं प्रायश्चित्तम् । गोहतविप्रहतात्मघातिनोरभिधाय—

एषामन्यतमं प्रेतं यो दहेत वहेत वा ।
कटोदककियां कृत्वा *तप्तकृच्छ्रेण शुद्ध्यति ॥

इति संवर्तवचनात् । कटोदककियापूर्वकतप्तकृच्छ्रे पादोनधेनुचतुष्टयम् ॥

गोहतविप्रहतात्मघातिशवस्पर्शे तदर्थाश्रुपाते च एकोपवासः प्रायश्चित्तम् । तथाहि ब्रह्मपुराणे—

पतितानां न दाहःस्यान्नान्त्येष्टि र्नास्थिसञ्चयः ।
नाश्रुपातश्च पिण्डो वा कार्यं श्राद्धादिकं क्वचित् ॥
एतानि पतितानां तु यः करोति विमोहितः ।
तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्नचान्यथा ॥ इति ॥

तप्तकृच्छ्रद्वये सार्द्धसप्त धेनवः ॥

(अथ गवाभिचारे व्यवस्था)

ज्ञानतः स्वोत्तमवर्णस्त्रीगमने सर्वेषां प्राणान्तिकं

---

* तप्तकृच्छ्रलक्षणमाह मनुः—

तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् ।
प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः ॥

प्रायश्चित्तम् । तदाह वसिष्ठः—

*शूद्रश्चेद् ब्राह्मणीमभिगच्छेद्वीरणदलैर्वेष्टयित्वा शूद्रमग्नौ प्राश्येत् । वैश्याश्चेद्ब्राह्मणीमभिगच्छेल्लोहितदलैर्वेष्टयित्वा वैश्यमग्नौ प्राश्येत् । राजन्यश्चेद्ब्राह्मणीमभिगच्छेत् शरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्राश्येत् । ब्राह्मण्याः शिरोवपनं कारयित्वा सर्पिषाऽभ्यज्य नग्नां खरमारोप्य महापथमनुव्राजयेत् पूता भवतीति विज्ञायते इति ।

*अज्ञानतस्तु क्षत्रियादित्रयाणां ब्राह्मणीगमने षट्नवद्वादशवार्षिकं प्रायश्चित्तं शूद्रस्य क्षत्रियागम-

---

* इमे श्लोका वशिष्ठोक्तेरनुवादरूपा बोध्याः ।
ज्ञानतो ब्राह्मणीं गच्छेत्सकृत् शूद्रस्तु यस्तदा ।
वीरणदलै र्वेष्टयित्वा शूद्रमग्नौ प्रवेशयेत् ॥
वैश्यश्चेद्ब्राह्मणीं गच्छेत्सकृज्ज्ञानात्तु यस्तदा ।
लोहितदलै र्वेष्टयित्वा वैश्यमग्नौ प्रवेशयेत् ॥
ब्राह्मणीमभिगच्छेद्यो राजन्यो ज्ञानतः सकृत् ।
शरपत्रै र्वेष्टयित्वा तमग्नौ संप्रवेशयेत् ॥
ब्राह्मण्या मुण्डवपनं कारयित्वाथ सर्पिषा ।
अभ्यज्य हीनवस्त्रां तु खरमारोप्य तां पुनः ॥
महापथं तदा पूता साऽनुसंव्राजयेद्यदि ॥ इति ॥

†अज्ञानतस्तु शूद्रस्य ब्राह्मणीगमने द्वादशवार्षिकं वैश्यस्य नववार्षिकं क्षत्रियस्य षाड्वार्षिकं प्रायश्चित्तम् । एवं शूद्रस्य क्षत्रियागमने नववार्षिक वैश्यागमने षाडवार्षिकं प्रायश्चित्तम् । तथा च बृहत्प्रचेताः—

ने नववार्षिकं वैश्यागमने षड्वार्षिकम् । एवमन्य त्राप्यूह्यम् ।

(नट्यादिगमने प्रायश्चित्तम्)

सकृदज्ञानतो नटीशैलूषिकीवेणुजीविन्यन्त्यजागमने ब्राह्मणस्य चान्द्रायणं प्रायश्चित्तम् ।

नटीं शैलूषिकीञ्चैव रजकीं वेणुजीविनीम् ।
गत्वा चान्द्रायणं कुर्यात्तथा चर्मोपजीविनीम् ॥

इति सम्बर्तवचनात् । चान्द्रायणे सार्द्धसप्त धेनवः ॥ अत्र कैवर्त्याद्यन्त्यजाऽनभिधानेऽपि

बहूनामेकधर्माणामेकस्यापि यदुच्यते ।
सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृताः ॥

इति बौधायनवचनात्तेषामप्येतदेव प्रायश्चित्तम् ॥

सकृदज्ञानतो नटीवेणुजीविन्यन्त्यजादिगमने क्ष-

शूद्रस्य ब्रह्मणीं मोहात् गच्छतः शुद्धिमिच्छतः ।
पूर्णमेतद्व्रतं देयं माता यस्माद्धि तस्य सा ॥
पादहान्याऽन्यवर्णासु गच्छतः सार्ववर्णिकम् ।
प्रायश्चित्तमिदं देयमगम्यागमने क्रमात् ॥ इति ग्रन्थाभिप्रायः ।

त्रियस्य पादोनचान्द्रायणं वैश्यस्यार्द्धचान्द्रायणं शूद्रस्य चान्द्रायणपादः प्रायश्चित्तम् ।

सं- नटीं शैलूषिकीं चैव रजकीं वेणुजीविनीम् ।
व० गत्वा चान्द्रायणं कुर्यात्तथा चर्मोपजीविनीम् ।
वृ- विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वि० वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥

इत्यादिसम्वर्त्तबृहद्विष्णुवचनाभ्याम् ॥

ज्ञानतः सकृदन्त्यजादिस्त्रीगमने ब्राह्मणस्य चान्द्रायणम्प्रायश्चित्तम् ।

रजकव्याधशैलूषवेणुचर्मोपजीविनीम् ।
कामतस्तु यदागच्छेच्चरेच्चान्द्रायणद्वयम् ॥

इति सम्वर्त्तवचनात् । चान्द्रायणद्वये पञ्चदश धेनवः । क्षत्रियादीनां त्रयाणां सार्द्धचान्द्रायणम् । एकचान्द्रायणम् । अर्द्धचान्द्रायणम् । प्रागुक्तसंवर्त-बृहद्विष्णुवचनाभ्याम् ।

ज्ञानतो द्विरभ्यासादन्त्यजस्त्रीगमने कृच्छ्राब्दम्, अज्ञानाच्चान्द्रायणद्वयं प्रायश्चित्तम् । रजकाद्यन्त्यजा-

नभिधाय—

भुक्त्वा चैषां स्त्रियोगत्वा पीत्वाऽपः प्रतिगृह्य च ।
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥

इति यमवचनात् । कृच्छ्राब्दे त्रिंशद्धेनवः । चान्द्रायणद्वये पञ्चदश धेनवः ॥

अज्ञानतश्चतुर्विंशतिधाऽन्त्यजस्त्रीगमने ब्राह्मणस्य द्वादशवार्षिकं प्रायश्चित्तम् । रजकाद्यन्त्यजानभिधाय—

एतेषां तु स्त्रियो गत्वा पीत्वाऽपः प्रतिगृह्य च ।
*पतत्यज्ञानतो विप्रो ज्ञानात् †साम्यं तु गच्छति ॥

इति यमवचनात् । द्वादशवार्षिके साऽशीत्युत्तराशतधेनवः (१८०) ॥ ज्ञाने द्विगुणप्रायश्चित्ते कृतेऽपि अव्यवहार्यतेति शूलपाणिः ॥

(शौण्डिकस्त्रीगमने प्रायश्चित्तम्)

अज्ञानतः सकृत् शौण्डिकस्त्रीगमने ब्राह्मणस्य चान्द्रायणं ज्ञानतश्चान्द्रायणद्वयं प्रायश्चित्तम् ।

---

* पततीति । पतितत्वाद्द्वादशवार्षिकव्रतभाग्भवतीत्यर्थः ।
† साम्यमिति । तत्साद्दश्यात्प्राणान्तिकदण्डभाग् भवतीत्यर्थः ।

सं- नटीं शैलूषिकीं चैव रजकीं वेणुजीविनीम् ।
व० गत्वा चान्द्रायणं कुर्यात्तथा चर्मोपजीविनीम् ॥
वौ- बहूनामेकधर्माणामेकस्यापि यदुच्यते ।
धा० सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृताः ॥

इत्यादि सम्वर्तबौधायनवचनाभ्याम् । चान्द्रायणद्वये पञ्चदश धेनवः ।

अज्ञानतः सकृत् शौण्डिकस्त्रीगमने क्षत्रियस्य पादोनचान्द्रायणम्। वैश्यस्यार्द्धचान्द्रायणम्। शूद्रस्य-चान्द्रायणपादं प्रायश्चित्तम् ।

नटीं शैलूषिकीमित्यादि, बहूनामित्यादि,

विप्रे तु सकलं देय मित्यादि,

सम्वर्तबौधायनबृहद्विष्णुवचनेभ्यः ॥

अभ्यासेनाऽष्टधाचतुर्विंशतिधाप्रभृति तद्गमने * अन्त्यजस्त्रीगमनवदेव व्यवस्था ।

बहूनामेकधर्माणामेकस्यापि यदुच्यते ।

इति वचनं तत्र हेतावधिकम् ॥

* अन्त्यज स्त्रीगमने द्वादशवार्षिकं प्रायश्चित्तमुक्तं तदेवात्रापि बोध्यम् ॥

अज्ञानतः सकृत्तैलिकस्त्रीगमने ज्ञानतो वाभ्यासेन वा ब्राह्मणादिचतुर्णामन्त्यजस्त्रीगमनवदेव *प्रायश्चित्तं व्यवस्थापत्रञ्च। तत्र

आप-चक्रोपोजीवी रजकः कितवस्तस्करस्तथा।
बौधा-वहूनामेकधर्माणामेकस्यापि यदुच्यते।

इत्याद्यापस्तम्बबौधायनवचने हेतावधिके अन्यत्समानम् ॥

तन्तुवायस्याऽन्त्यजतैलिकसाम्यप्रापकवचनं तैलिकान्नजलपानप्रकरणे † अभिहितम्।

---

* सकृदज्ञानतोऽन्त्यजस्त्रीगमने ब्राह्मणस्य चान्द्रायणं प्रायश्चित्तमुक्तम्।

नटीं शैलूषिकीं चैव रजकीं वेणुजीविनीम्।
गत्वा चान्द्रायणं कुर्यात्तथा चर्मोपजीविनीम् ॥

इति सम्वर्तवचनात्। चान्द्रायणे सप्तधेनवः। क्षत्रियस्य पादोन चान्द्रायणम्। वैश्यस्य चान्द्रायणार्द्धम्। शूद्रस्य चान्द्रयणपादः प्रायश्चित्तम्। क्षत्रियादीनां पादपादहीने प्रायश्चित्ते—

विप्रेतु सकलं देयं पादोनं क्षत्रिये मतम्।

इत्यादि संवर्तवचनं प्रमाणत्वेनावसेयम् ॥

† गान्धर्वो लौहकारश्च शौण्डिकस्तन्तुवायकः।
चक्रोपजीवी रजकः कितवस्तस्करस्तथा ॥

इत्यादिवचनमभिहितम् ॥

अज्ञानतः सकृत् चाण्डालीगमने ब्राह्मणस्य द्वादशवार्षिकव्रतं प्रायश्चित्तम् । तथाहि यमः—

चाण्डालीम्ब्राह्मणो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यंतु गच्छति ॥ इति

साम्यमिति प्राणान्तिकपरः । तदाह यमः—

रेतः सिक्त्वा कुमारीषु चाण्डालीषु सुतासु च ।
सपिण्डस्यापि दारेषु प्राणत्यागो विधीयते ॥ इति

क्षत्रियादीनां मरणवैकल्पिकचतुर्विंशतिवार्षिकव्रतपादपादहीनन्तदेव । विप्रे तु सकलं देयमित्यादि बचनात् ॥

अज्ञानतः सकृत् म्लेच्छस्त्रीगमने ब्राह्मणादीनां चाण्डालीगमनवदेव प्रायश्चित्तव्यवस्था । तत्र—

बलाद्दासीकृता ये च म्लेच्छचाण्डालदस्युभिः ।
बहूनामेकधर्माणामेकस्यापि यदुच्यते ।

इति देवल-बौधायनबचने हेतावधिके अन्यत्समानम् ॥ म्लेच्छलक्षणमाह बौधायनः—

गोमांसखादको यस्तु विरुद्धं बहु भाषते ।

सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते ॥ इति ॥

(अथाऽप्रतिग्राह्यप्रतिग्रहप्रायश्चित्तव्यवस्था)।

तत्राऽदृष्टार्थदत्तद्रव्यस्वीकारः प्रतिग्रहः। स्वस्त्याद्यभावेन विधिना तन्नाभूतं नतु प्रतिग्रह एव तन्नाभवत् इति शूलपाणिः। ज्ञानाभ्यासेन पतितप्रतिग्रहे मासोपवासः। अज्ञानाभ्यासेन पतितप्रतिग्रहे चान्द्रायणं प्रायश्चित्तम्। तदाह बृहस्पतिः—

पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च।
मासोपवासं कुर्वीत् चान्द्रायणमथापि वा ॥ इति ॥

शूलपाणिः—

*सकृत् ज्ञानतः पतितप्रतिग्रहे चान्द्रायणम्। अज्ञानतश्चान्द्रायणार्द्धं प्रायश्चित्तम्। ज्ञानतः सकृद्भोजने प्रतिग्रहे च चान्द्रायणमिति। अज्ञानतोऽर्द्धमिति।

---

* इदं श्लोकद्वयमुपरिष्टाच्छूलपाण्युक्तस्य सकृदित्याद्यज्ञानतोऽर्द्धमित्यन्तस्यानुवादरूपम्बोध्यम्—

पतितप्रतिग्रहे कुर्यादैन्दवं ज्ञानतः सकृत्।
अज्ञानतस्तदर्द्धं तु प्रायश्चित्तं विशुद्धये ॥
चरेच्चान्द्रायणं विप्रो व्रतं हि ज्ञानतः सकृत्।
चान्द्रायणार्द्धमज्ञानात् भोजने च प्रतिग्रहे ॥

मासोपवासे पञ्चदश (१५) धेनवः । चान्द्रायणे सार्द्धसप्त (७॥) धेनवः ॥

सकृदज्ञानतोऽन्त्यजचाण्डालप्रतिग्रहे ब्राह्मणस्य तप्तकृच्छ्रम् । ज्ञानात्सकृदन्त्यजचाण्डालप्रतिग्रहे चान्द्रायणं प्रायश्चित्तम् । तदाह मनुः—

चाण्डालान्त्यस्त्रियौ गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति॥ इति

चाण्डालान्त्यजप्रतिग्रहे चाण्डालसिद्धान्नभोजनवत्प्रायश्चित्तोपदेशात् अन्त्यावसायिनामन्नमित्याद्यापस्तम्बवचनेन सकृदज्ञानतश्चाण्डालसिद्धान्नभोजने तादृशप्रायश्चित्तोपदेशात्तथा पर्यवसानात् । तप्तकृच्छ्रे धेनुचतुष्टयं (४) चान्द्रायणेऽष्टौ (८) धेनवः ॥

अज्ञानतोऽष्टचत्वारिंशद्वारचाण्डालान्त्यजप्रतिग्रहे ब्राह्मणस्य द्वादशवार्षिकव्रतं ज्ञानतोऽष्टचत्वारिंशद्वारचाण्डालान्त्यजयोः प्रतिग्रहे चतुर्विंशतिवार्षिकम्प्रायश्चित्तम् । तदाह मनुः—

चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यं तु गच्छति ॥ इति

पतितत्वाद द्वादशवार्षिकम्प्रतीयते। ज्ञानात्पुनश्चाण्डाल समत्वात् चतुर्विंशतिवार्षिके व्रतेऽपि कृतेऽव्यवहार्यते ति शूलपाणिः। द्वादशवार्षिकव्रते अशीत्युत्तरशतधेन वः (१८०) ॥

शौण्डिकप्रतिग्रहे तैलिकप्रतिग्रहवद्व्यवस्था। शौण्डिकाः काण्डिका षण्डा इत्यादि यमवचनेन तयोः साम्यावगमात्। बहूनामेकधर्माणामिति बौधायनवचनात्तथा पर्यवसानात्। तैलिकप्रतिग्रहेऽज्ञानज्ञानाभ्यां तप्तकृच्छ्रचान्द्रायणमनुपदम्प्रागुक्तमेव ॥

अज्ञानतः सकृच्छूद्रप्रतिग्रहे ब्राह्मणस्य गृहीतद्रव्यत्यागपूर्वकसपादप्राजापत्यत्रयं द्विरक्तिकरजतमाषकञ्च प्रायश्चित्तम्।

यद्*गर्हि तेनार्जयन्ति कर्मणा ब्राह्मणा धनम्।

---

* गर्हितेनेति। निन्दितेनेत्यर्थः। अप्रतिग्राह्यप्रतिग्रहादिनेति यावत्

*तस्योत्सर्गेण शुद्ध्यन्ति जप्येन तपसैव वा ॥
जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः ।
मासं †गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् ॥

इति मनुवचनात् । ज्ञानतो द्वैगुण्यं शूलपाणिसम्मतमेतत् ।

अज्ञानाभ्यासेन शूद्रप्रतिग्रहे ब्राह्मणस्य चान्द्रायणमेकम्प्रायश्चित्तम् ।

संकरापात्रकृत्यासु मासं शोधनमैन्दवम् ।

इति मनुवचनात् । चान्द्रायणे सार्धसप्त धेनवः ॥

(अथ गोमांसभक्षणप्रायश्चित्तव्यवस्था)

सकृदज्ञानतो गोमांसभक्षणे द्विजातीनां प्राजापत्यं ‡चान्द्रायणञ्च प्रायश्चित्तम् ।

सु- ††गोमांसभक्षणे प्राजापत्यञ्चरेदिति,

---

* तस्योत्सर्गेणेति । तस्य गृहीतधनस्येत्यर्थः। उत्सर्गेण त्यागेनेत्यर्थः ।

† गोष्ठ इति । यस्मिन् स्थाने गावस्तिष्ठन्ति तस्मिन् स्थान इत्यर्थः ॥

‡ संस्काराकरणे चान्द्रायणमिति शूलपाणि ग्रन्थाभिप्रायेण चान्द्रायणञ्चेत्युक्तम् ।

†† अज्ञानतो द्विजातीनां सकृद्गोमांसभक्षणे ।
प्राजापत्यव्रतं तेषां प्रायश्चित्तं विशुद्धये ॥ इति सुमन्तोरभिप्रायः ।

वि- * ग्रामकुक्कुटनरगोमांसभक्षणे सर्वेषां द्विजातीनां प्रायश्चित्तान्ते भूयः संस्कारं कुर्यात्

इति सुमन्तु-विष्णुवचनाभ्याम्। संस्काराकरणे चान्द्रायणमिति शूलपाणिलिखनाच्च। चान्द्रायणे सार्द्धसप्त (७॥) धेनवः। प्राजापत्ये धेनुरेका॥

सकृत् ज्ञानतो द्वैगुण्यं तत्र—

स्यादकामकृते यत्तद्द्विगुणं बुद्धिपूर्वके।

इत्यङ्गिरोवचनमधिकं हेतौ।

ज्ञानाभ्यासे गोमांसभक्षणे चान्द्रायणद्वयं † सवृषगोदक्षिणाकम्प्रायश्चित्तम्।

अगम्यागमने चैव मद्यगोमांसभक्षणे।
शुद्ध्यै चान्द्रायणं कुर्यान्नदीं गत्वा समुद्रगाम्।
अनडुत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम्॥

ग्रामकुक्कुटनरगोमांसभक्षणे इत्यादि-

---

* एषां मांसभक्षणे प्राजापत्यं तदुत्तरं पुनः संस्कारश्च प्रायश्चित्तमिति विष्णोरभिप्रायः।

† वृषेण सहिता सवृषा सा गौ दक्षिणा यस्य चान्द्रायणद्वयस्य तत् सवृषगोदक्षिणाकम्। चान्द्रायणद्वयोत्तरं सवृषा गौ ब्राह्मणाय दक्षिणा देयेत्यर्थः।

पराशर-विष्णुवचनाभ्याम्। संस्काराकरणे चान्द्राय-णमिति शूलपाणिलिखनाच्च। चान्द्रायणे पञ्चदश धेनवः। सवृषगोमूल्यं षट्कार्षापणाः।

चिरतरकालाभ्यासेन गोमांसभक्षणे सम्वत्सरव्रतं चान्द्रयणम्प्रायश्चित्तम्।

गामश्वं कुञ्जरोष्ट्रौ च सर्वं पंचनखं तथा।
क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्सम्वत्सरव्रतम्॥

इति। ग्रामकुक्कुटनरगोमांसभक्षणेत्यादि, शङ्खविष्णुवचनाभ्याम्। संस्काराकरणे चान्द्रायण-मिति शूलपाणिलिखनाच्च। सम्वत्सरव्रते पञ्च-दश (१५) धेनवः। एतच्च द्विजातीनाम्। तत्रापि क्षत्रियादीनां पादपादहानिः। संस्कारानुकल्प-चन्द्रायणे तु साम्यम्॥

सकृदज्ञानतो गोमांसभक्षणे शूद्रस्य प्राजाप-त्यपादम्प्रायश्चित्तम्।

गोमांसभक्षणे प्राजापत्यं चरेत्।

इति सुमन्तुवचनात्। विप्रे तु सकलं देयमित्यादि-

बृहद्विष्णुवचनाच्च । प्राजापत्यपादे द्वादश पणाः । अभ्यासादौ पूर्वोक्तब्राह्मणप्रायश्चित्तपादप्रायश्चित्तम् । तत्रोहेन व्यवस्थापत्रं कर्तव्यम् । संस्कारानुकल्पचान्द्रायणमस्य नास्ति द्विजातीनामिति विशेषाऽभिधानात् ।

१चिरतरकालाऽभ्यासेनाऽश्वकुञ्जरक्रव्यादभक्ष्याऽतिरिक्तपञ्चनखग्रामकुक्कुटोष्ट्रमांसभक्षणकर्तुं ब्राह्मणस्य संवत्सरव्रतं चान्द्रायणं च प्रायश्चित्तम् ।

ग्रामश्वं कुञ्जरोष्ट्रौ च सर्वं पञ्चनखं तथा ।
क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्सम्वत्सरव्रतम् ॥

२ ग्रामकुक्कुटनरगोमांसभक्षणे सर्वेषां द्विजातीनां प्रायश्चित्तान्ते भूयः संस्कारं कुर्यात्,

इति शङ्खविष्णुवचनाभ्याम् । सर्वभक्ष्यशशकातिरिक्तविषयम् । सम्वत्सरव्रते पञ्चदश (१५) धेनवः ।

---

१ चिरतरेति । कुञ्जरो हस्ती । क्रव्यादः आममांसभक्षकः शृगालादिः । काकादिर्वा ।

२ द्विजातयो ग्रामकुक्कुटनरगोमांसभक्षणे ।
प्रायश्चित्तावसाने तु पुनः संस्कारभाजिनः ॥
इति विष्णुवचनानुवादः ।

चान्द्रायणे सार्द्धसप्त (७ ॥) । एवं क्षत्रियवैश्ययोः पादपादहीनं सम्वत्सरव्रतम् १चान्द्रायणञ्च । तत्र प्रागुक्तशंखविष्णुवचने, विप्रे तु सकलं देयमिति वचनं च हेतौ देयम् । शूद्रस्य मासत्रयव्रतं प्रायश्चित्तम् । तत्र प्रागुक्तशंखवचनं विप्रे तु सकलं देयमिति वचनञ्च हेतुः ।

सकृदज्ञानतोऽश्वादिमांसभक्षणे तु गोमांसभक्षणवदेव २प्रायश्चित्तम् ।

गामश्वं कुञ्जरोष्ट्रौ चेत्यादिवचनेनाऽभ्यासेनाऽश्वादिमांसभक्षणे गोमांसभक्षणवत्प्रायश्चित्तोपदेशात् । बहूनामिति वचनात्सर्वत्र साम्यात् ।

सकृद् ज्ञानतो ग्राम्यवराहमांसभक्षणे ब्राह्मणस्य चान्द्रायणं प्रायश्चित्तम् । तथाहि याज्ञवल्क्यः—

३पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटम् ।

---

१. चान्द्रायणव्रतलक्षणं प्रागुक्तम् ।

२ सम्वत्सरव्रतात्मकं प्रायश्चित्तमित्यर्थः ।

३ पलाण्डुम् (पियाज) इति भाषायां प्रसिद्धम् । विड्वराहं (ग्रामशूकरम्) । छत्राकं (भूछाता) इति भाषायां प्रसिद्धम् । लशुनं (लहसुन) इति भाषायां प्रसिद्धम् । गृञ्जनं (गाजर) इति भाषायां प्रसिद्धम् । जग्ध्वेति । अद्धातोः क्त्वाप्रत्यये रूपम् ।

लसुनं गृञ्जनं चैव जग्ध्वा चान्द्रायणं चरेत् इति, अज्ञानतो वराहमांसभक्षणे चान्द्रायणार्द्धम्। (पलाण्डुं विड्वराहं च)त्यादि याज्ञवल्क्यवचनात्। अज्ञानतस्तप्तकृच्छ्रमिति शूलपाणिलिखनाच्च। तप्तकृच्छ्रे पादोनधेनुचतुष्टयम्। (३॥) क्षत्रियादीनां पादपादहीनं तत्तदेव प्रायश्चित्तम्॥

सकृदज्ञानतो [1]रेतोमूत्रपुरीषभक्षणे ब्राह्मणस्य तप्तकृच्छ्रम्। संस्कारानुकल्पचान्द्रायणं च प्रायश्चित्तम्। तदाह गौतमः—

[2] मूत्रपुरीषरेतसां प्राशने तप्तकृच्छ्रमिति।

याज्ञवल्क्यः—

अज्ञानातु सुरां पीत्वा रेतोविण्मूत्रमेव च।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः॥इति

सकृद् ज्ञानतो रेतोमूत्रपुरीषभक्षणे ब्राह्मणस्य तप्तकृच्छ्रद्वयं चान्द्रायणद्वयं च प्रायश्चित्तम्।

---

१ रेतो वीर्यम्। रेतश्शब्दः सान्तः क्लीवः।
२ रेतसः प्राशने तप्तकृच्छ्रं मूत्रपुरीषयोः।
इति गौतमवचनानुवादः।

मूत्रपुरीषरेतसां प्राशने तप्तकृच्छ्रमिति,

अज्ञानात्तु सुरां पीत्वा रेतोविण्मूत्रमेव चेत्यादि,

स्यादकामकृते यत्तद्द्विगुणमिति वचनेभ्यः ।

बलात्कारेण मूत्रपुरीषभक्षणे ब्राह्मणस्य प्राजापत्यं चान्द्रायणं च प्रायश्चित्तम्। तदुक्तमापस्तम्बेन—

विण्मूत्रभक्षणे विप्रः प्राजापत्यं समाचरेत् ॥इति॥

याज्ञवल्क्येनाप्युक्तम्—

अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव च ।

पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः॥इति॥

चान्द्रायणमत्र संस्कारानुकल्पं (संस्काराकरणे) चान्द्रायणमिति शूलपाणिलिखनात् ॥

सकृदज्ञानतः[1]कलविङ्क—हंस—मद्गु—वक—काक-सारस—दात्यूह—शुक—सारिक—भास—बलाक—कोकिल खंजरीट भोजने ब्राह्मणस्य त्रिरातव्रतं प्रायश्चित्तम् ।

२ कलविङ्क हंस-मद्गु-वक-काक-सारस-दात्यूह-

---

१ इमे पक्षिविशेषाः ।

२ कलविंकश्च हंसश्च मद्गुः काको वकस्तथा ।
दात्यूहः सारसश्चैव शुकश्च सारिका तथा ॥
बलाकः कोकिलो भासः खञ्जरीटस्तथा पुनः ।
त्रिरात्रमुपवासो हि व्रतमेषाञ्च भक्षणे ॥

शुक-सारिक-भास-बलाक-कोकिल-खञ्जरीटाद्यशने त्रिरात्रमुपवसेत्। इति विष्णुवचनात्

त्रिरात्रोपवासेऽर्द्धधेनुमूल्यं ज्ञानतो द्वैगुण्यम्। तत्र-

स्यादकामकृते यत्तद्द्विगुणं बुद्धिपूर्वके।

इत्याङ्गिरोवचनं हेतुः॥

कामतोऽत्यन्ताऽभ्यासेन कोकिल-चक्रवाक-प्लव-मण्डूक-भुजग-हंसादिभक्षणे ब्राह्मणस्य मासव्रतं प्रायश्चित्तम्। तदाह शंखः-

हंसं मद्गुञ्च काकोलं काकं वा खञ्जरीटकम्।
मत्स्यादांश्च तथा मत्स्यान् बलाकां शुकसारिके॥
चक्रवाकं प्लवं कोलं मण्डूकं भुजगन्तथा।
मासमेतद्व्रतं कुर्याद् भूयश्च तन्न भक्षयेत्॥

अकामतोऽभ्यासे एतस्यार्द्धम्। यत्राऽभक्ष्यमांसविशेषे विशेषतः प्रायश्चित्तं नोक्तं तत्र सामान्याऽभक्ष्यमांसभक्षणप्रायश्चित्तानुसारेणैव व्यवस्था। तथाहि-सकृदज्ञानतोऽभक्ष्यमांसभक्षणे सप्तरात्रयवपानं प्रायश्चित्तम्। तदाह मनुः-

भुक्त्वा मांसमभक्ष्यञ्च सप्तरात्रंयवान्पिबेत् इति॥ एतदशक्तौ चतुर्विंशतिपणदानम्। ज्ञाने तु एतद्द्विगुणम्। अभ्यासेनाऽभक्ष्यमांसभक्षणे मासयावकव्रतम्प्रायश्चित्तम्। अभक्ष्यमांसमभिधाय शंखवचनम्

मांसमन्यदतो भुक्त्वा सम्प्रोक्तं व्रतमाचरेत्॥

सम्प्रोक्तं मासयावकव्रतम्। एतद्व्रताकरणे धेनुद्वयम् शावाशौचे मत्स्यमांसभक्षणे प्राजापत्यं प्रायश्चित्तम्।

मत्स्यमांसादि न भक्षेयुराप्रदानादिति।

अकुर्वन् विहितं कर्म निन्दितं च समाचरन्॥

यत्रोक्तं यत्र वा नोक्तमिह पातकनाशनम्। इत्यादि गौतम मन्वादिवचनेभ्यस्तथैव पर्यवसानात्। आप्रदानात् प्रदानमाद्यश्राद्धे तेनाऽऽद्यश्राद्धात्पूर्वादिनपर्यन्तमित्यर्थः।

यत्रोपपातकविशेषे विशेषतः प्रायश्चित्तं नास्ति तत्रोपपातकसामान्यप्रायश्चित्तमेव। तदुच्यते-उपपातककर्तुस्त्रैमासिकव्रतं चान्द्रायणं वा मासं पयःपानं वा पराको वा प्रायश्चित्तं त्रैमासिकव्रतमभिधाय मनुवचनम्—

एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः ।
अवकीर्णिवर्ज्जं शुद्ध्यर्थञ्चान्द्रायणमथापि वा ॥

याज्ञवल्क्यवचनम्—

उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा ।
पयसा वाऽपि मासेन पराकेणाथ वा पुनः ॥इति॥

एतच्च त्रैमासिकविकल्पो लघुगुरुपापानुसारेण लघुगुरुप्रायश्चित्तव्यवस्थापकम् ।

एतान्येव प्रायश्चित्तानि लाघवगौरवमवगम्य व्यवस्थेयानि, इति शूलपाणिलिखनात् ।

उपपातकान्याह मनुः—

१ गोवधोऽयाज्ययाज्यः पारदार्यात्मविक्रयः ।
पितृमातृगुरुत्यागः स्वाध्यायाग्न्योः सुतस्य च ॥
परिवेत्ताऽनुजेऽनूढे परिवेदनमेव च ।
तयोर्दानञ्च कन्यायास्तयोरेव च याजनम् ॥

१ गोवधो गोहननम् । अयाज्ययाजनं जातिकर्मदुष्टानां याजनम । मातृपितृगुरुत्यागः । एषां शुश्रूषाद्यकरणम् । स्वाध्यायो ब्रह्मयज्ञः, अग्निः स्मार्ताग्निस्तयोस्त्यागः । सुतस्य त्यागः पुत्रस्य संस्कारभरणाद्यकरणम् ।

१ कन्याया दूषणञ्चैव वार्धुष्यं व्रतलोपनम् ।
तडागारामदाराणामपत्यस्य च विक्रयः ॥
२ व्रात्यता बान्धवत्यागो भृतकाऽध्यापनन्तथा ।
भृत्या चाऽध्ययनादानमपण्यानाञ्च विक्रयः ॥
सर्वाकरेष्वधिकारो महामन्त्रप्रवर्तनम् ।
हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म च ॥
इन्धनार्थमशुष्काणां द्रुमाणामवपातनम् ।
आत्मार्थं च क्रियारंभो निन्दितान्नादनं तथा ॥
अनाहिताग्नितास्तेयमृणानाञ्चानपक्रिया ।
३ असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया ।
धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवनम् ॥
स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यञ्चोपपातकम् ॥

अयाज्यसंयाज्यः हीनवर्णानां याजनम् । पारदार्यं परस्त्रीमैथुनम् । परिवेत्ता ज्येष्ठेऽविवाहिते

---

१ कन्याया दूषणं कन्याया मैथुनवर्जमंगुलिप्रक्षेपादिना दूषणम् । वार्धुष्यं वृद्धिजीवनम् । व्रतलोपनम् व्रतत्यागः । ब्रह्मचारिणो मैथुनम् ।

२ व्रात्यता यथाकालमनुपनयनम् ।

३ असच्छास्त्राधिगमनम्-श्रुतिस्मृतिविरुद्धशास्त्रशिक्षणम् । कौशीलव्यस्य क्रिया-नृत्यगीतवाद्यादित्रोपसेवनम् ।

विवाहितकनिष्ठः सोदरः। सर्वाकरेषु रत्न्याद्युत्पत्तिस्थानेषु। मद्यपस्त्रीनिषेवनम्। मद्यपायाः स्त्रिया मैथुनम्। ब्राह्मणस्येति शूलपाणिः। मूलकर्म वशीकरणोच्चाटनादिकरणम्। नास्तिक्यं परलोकेऽरितत्वाभावज्ञानम्।

उपपातकेषु गोबधप्रायश्चित्तव्यवस्थोच्यते—

ब्राह्मणस्वामिकैकहायनद्विहायनत्रिहायनगोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य सपादैकादशदिनव्रतं सार्द्धद्वाविंशतिदिनव्रतं पादोनदिनचतुष्टयाधिकमासिकव्रतम्प्रायश्चित्तम्। तथा च वृद्धप्रचेतोवचनम्—

१ एकवर्षे गवि हते कृच्छ्रपादो विधीयते।
अबुद्धिपूर्वं पुंसः स्याद्द्विपादस्तु द्विहायने॥
त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परम्।
सपादैकादशदिनव्रताकरणे षट्पणाधिकषट्-

१ एकं वर्षं यस्य स तस्मिन्। गोशब्दोऽत्र स्त्रीपुम्बोधकः। अबुद्धिपूर्वमित्यस्याऽज्ञानपूर्वकमित्यर्थः। प्राजापत्यमिति। अतः परं त्रिहायनादधिकवर्षे गवि हते सतीत्यर्थः।

कार्षापणदानम् । सार्द्धद्वाविंशतिदिनव्रताकरणे द्वादशपणाधिकद्वादशकार्षापणदानम् । पादोनदिनचतुष्ट्याधिकमासिकव्रताकरणे पणद्वयाधिकोनविंशतिकार्षापणदानम् । १ दक्षिणा अत्र द्वादशचतुर्विंशति-षट्त्रिंशत्पणाः क्रमेण देयाः । २ ज्ञानतो द्वैगुण्यम् ।

ब्राह्मणस्वामिकैकहायन-द्विहायन-त्रिहायनगोसाक्षादबुद्धिपूर्वकवधे क्षत्रियस्य सार्द्धाष्टदिनव्रतम् प्रहरोनसप्तदशदिनव्रतम्, सार्द्धप्रहरद्वयाधिकपञ्चविंशतिदिनव्रतम्प्रायश्चित्तम् । तथा च वृद्धप्रचेताः—

एकवर्षे गवि हते कृच्छ्रपादो विधीयते । इत्यादि

बृहद्विष्णुः—

विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।

---

१ दक्षिणास्तु-एकवर्षे गवि हते द्वादश पणा दक्षिणाः । द्विवर्षे गवि हते चतुर्विंशतिपणा दक्षिणाः । त्रिहायने गवि हते षट्त्रिंशत्पणा दक्षिणाः ।

२ ज्ञानत इति । एकवार्षिके गवि हते चतुर्विंशतिपणाः । द्विवार्षिके अष्टचत्वारिंशत्पणाः । त्रिवार्षिके द्विसप्ततिपणा दक्षिणा देया इत्यर्थः ।

इत्यादि। सार्द्धाष्टदिनव्रताकरणे सार्द्धद्वादशपणाधिककार्षापणचतुष्टयदानम्। प्रहरोनसप्तदशदिनव्रताकरणे नवपणाधिकनवकार्षापणदानम्। सार्द्धप्रहरद्वयाधिकपञ्चविंशतिदिनव्रताकरणे सार्द्धपंचपणाधिकचतुर्दशकार्षापणदानम्। दक्षिणा च नवाष्टादशसप्तविंशतिपणाः क्रमेण देयाः। ज्ञानतो[1] द्वैगुण्यम्॥

ब्राह्मणस्वामिकैकहायनद्विहायनत्रिहायन गोसाच्चादबुद्धिपूर्वकबधे वैश्यस्य पंचप्रहराधिकपंचदिनव्रतम्। प्रहरद्वयाधिकैकादशदिनव्रतम्। प्रहरोनसप्तदशदिनव्रतम्प्रायश्चित्तम्॥ (एकवर्षे गवि हते) इत्यादि (विप्रे तु सकलमि)त्यादि वृद्धप्रचेतो बृहद्विष्णुवचनाभ्याम्॥

तादृशव्रतानामकरणे पणत्रयाधिककार्षापणत्रयं षट्पणाधिकषट्कार्षापणं नवपणाधिकनवका-

१ द्वैगुण्यमिति। सार्द्धद्वादशपणाधिककार्षापणचतुष्टयदाने अष्टादश पणाः। नवपणाधिकनवकार्षापणदाने सार्द्धपञ्चपणाधिकचतुर्दशकार्षापणदाने चतुष्पञ्चाशत्पणाः। इत्थंरीत्या द्विगुणा दक्षिणा बोध्या।

र्षापणन्देयम् । १ दक्षिणास्तु—षट्-द्वादशाष्टादश पणाः । ज्ञानतो २ द्वैगुण्यम् ॥

ब्राह्मणस्वामिकैकहायनद्विहायनत्रिहायन गोसाक्षादबुद्धिपूर्वकबधे शूद्रस्य सार्द्धप्रहरोनदिनत्रयव्रतम्, पञ्चप्रहराधिकएञ्चदिनव्रतम्, सार्द्धप्रहरत्रयाधिकाष्टदिनव्रतम्प्रायश्चित्तम् । (एकवर्षे गवि हते) इत्यादि (विप्रे तु सकलमि) त्यादि वृद्धप्रचेतोबृहद्विष्णुवचनाभ्याम् ॥

तादृशव्रतानामकरणे सार्द्धपणाधिकसार्द्धकार्षापणं पणत्रयाधिकसार्द्धकार्षापणत्रयं सार्द्धचतुःपणाधिकसार्द्धकार्षापणचतुष्टयं देयम् । दक्षिणास्तु पणत्रयं पणषट्कं नव पणाः क्रमेण देयाः । ज्ञानतो द्वैगुण्यम् ॥

---

१ दक्षिणास्त्विति । पणत्रयाधिककार्षापणत्रयदाने षट् पणा दक्षिणाः । षट्पणाधिकषट्कार्षापणदाने द्वादशपणा दक्षिणाः । नवपणाधिकनवकार्षापणदाने अष्टादशपणा दक्षिणाः ।

२ द्वैगुण्यमिति । द्वादशपणाः । चतुर्विंशतिपणाः । षट्त्रिंशत्पणाः । इत्थं क्रमेण द्वैगुण्यं बोध्यम् ।

१ क्षत्रियस्वामिकैकहायन-द्विहायन-त्रिहायन गोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य सार्द्धद्वाविंशतिदिनव्रतम्, सार्द्धमासिकव्रतम्, सार्द्धसप्तदिनाधिकद्विमासव्रतम्प्रायश्चित्तम् । एकवर्षे गवि हते) इत्यादि वृद्धप्रचेतो वचनात । तादृशव्रताकरणे सार्द्धकार्षापणचतुष्टयम्, नवकार्षापणम्, सार्द्धत्रयोदशकार्षापणं क्रमेण देयम् । दक्षिणा तु यत्किञ्चित् । ज्ञानतो द्वैगुण्यम् ॥

२ क्षत्रियस्वामिकैकहायन द्विहायन त्रिहायन-गोसाक्षादबुद्धिपूर्वकबधे क्षत्रियस्य सप्तदशदिनव्रतम् । पादोनदिनचतुष्टयाधिकमासव्रतम् । पञ्चप्रहराधिकविंशतिदिनसहितं मासव्रतम्प्रायश्चित्तम् । (एकवर्षे गवि हते) इत्यादिवृद्धप्रचेतोवचनात् । दक्षिणा तु यत्किञ्चित् ॥ तादृशव्रतानामकरणे

१ वर्णचतुष्टयस्य ब्राह्मणस्वामिकैकहायनादिगोवधप्रायश्चित्तमभिधाय क्षत्रियस्वामिकगोवधप्रायश्चित्तं ब्राह्मणस्य दर्शयति-क्षत्रियस्वामिकेति ।

२ क्षत्रियस्वामिकैकहायनादिगोबधे क्षत्रियस्य प्रायश्चित्तं दर्शयति-क्षत्रियस्वामिकेति ।

षट्पणाधिककार्षापणत्रयम् । द्वादशपणाधिकषट्कार्षापणम्। पणद्वयाधिकदशकार्षापणं क्रमेण देयम् ॥ ज्ञानतो द्वैगुण्यम् ॥

१ क्षत्रियस्वामिकैकहायनद्विहायनत्रिहायनगोसाक्षादबुद्धिपूर्वकबधे वैश्यस्य सपादैकादशदिनव्रतम् । सार्द्धद्वाविंशतिदिनव्रतम् । पादोनचतुस्त्रिंशद्दिनव्रतम्प्रायश्चित्तम् । (एक वर्षे गवि हते) इत्यादिवृद्धप्रचेतोवचनात् । तादृशव्रतानामकरणे सपादकार्षापणद्वयम् । सार्द्धकार्षापणचतुष्टयम् । पादोनसप्तकार्षापणन्देयम्। दक्षिणा तु यत्किञ्चित्। ज्ञानतो द्वैगुण्यम् ॥

२ क्षत्रियस्वामिकैकहायन–द्विहायन–त्रिहायनगोसाक्षादबुद्धिपूर्वकबधे शूद्रस्य पञ्चप्रहराधिकपञ्चदिनव्रतम् । सपादैकादशदिनव्रतम् । प्रहरोन-

---

१ । क्षत्रियस्वामिकैकहायनादिगोवधे वैश्यस्य प्रायश्चित्तं दर्शयति-क्षत्रियेति ।

२ क्षत्रियस्वामिकैकहायनादिगोवधे शूद्रस्य प्रायश्चित्तं दर्शयति-क्षत्रियेति ।

सप्तदशदिनव्रतम्प्रायश्चित्तम्। (एकवर्षे गवि हते) इत्यादि वृद्धप्रचेतोवचनात् । तादृशव्रताकरणे क्रमेण पणद्वयाधिकैककार्षापणम्। पणचतुष्टयाधिक कार्षापणद्वयम्। षट्पणाधिककार्षापणत्रयन्देयम् । दक्षिणा तु यत्किञ्चित् ज्ञानतो द्वैगुण्यम् ॥

१ वैश्यस्वामिकैकहायन–द्विहायन–त्रिहायन गोसाक्षादबुद्धिपूर्वकवधे ब्राह्मणस्य सार्द्धसप्तदिन व्रतम्। पञ्चदशदिनव्रतम् । सार्द्धद्वात्रिंशतिदिन-व्रतम्प्रायश्चित्तम् ॥ (एकवर्षे गवि हते) इत्यादि वृद्धप्रचेतोवचनात् । तादृशव्रताकरणे त्रिषट्नव-कार्षापणं क्रमेण देयम्। दक्षिणा तु द्वादश चतुर्विंशति षट्त्रिंशत् पणरूपा क्रमेण देया ॥ ज्ञानतो द्वैगुण्यम् ॥

२ वैश्यस्वामिकैकहायन–द्विहायन–त्रिहायन-गोसाक्षादबुद्धिपूर्वकवधे क्षत्रियस्य पञ्चप्रहराधिक-

१ इदानीं वैश्यस्वामिकैकहायनादिगोवधे ब्राह्मणस्य प्रायश्चित्त-माह–वैश्यस्वामिकेति ।

२ ब्राह्मणक्षत्रियस्वामिकैकहायनादिगोवधे वर्णचतुष्टयस्य प्रा-यश्चित्ताभिधानानन्तरं वैश्यस्वामिकैकवर्षगोवधे ब्राह्मणस्य प्राय-श्चित्तमभिधाय क्षत्रियस्य तमाह–वैश्येति ।

पञ्चदिनव्रतम्। सपादैकादशदिनव्रतम्। प्रहरोन-सप्तदशदिनव्रतम्प्रायश्चित्तम्। (एकवर्षे गविहते) इत्यादि (विप्रे तु सकलन्देयमि) त्यादि वृद्धप्रचेतो बृहद्विष्णु वचनाभ्याम्। तत्तद्व्रताकरणे सपादकार्षापणद्वयम् सार्द्धकार्षापणचतुष्टयम्। पादोनसप्तकार्षापणं क्रमेण देयम्। दक्षिणा तु नवाष्टादशसप्तविंशतिपणरूपा क्रमेण देया। ज्ञानतो द्वैगुण्यम्॥

१ वैश्यस्वामिकैकहायन द्विहायन त्रिहायन-गोसाक्षादबुद्धिपूर्वकबधे वैश्यस्य पादोनदिनचतुष्टयव्रतम्। सार्द्धसप्तदिनव्रतम्। सपादैकादशदिन-व्रतम्प्रायश्चित्तम्। (एकवर्षे गवि हते) इत्यादि (विप्रे तु सकलं देयमि) त्यादिवृद्धप्रचेतो बृहद्विष्णुवचनाभ्याम्। तत्तद्व्रताकरणे सार्द्धकार्षापणम्। कार्षापणत्रयम्। सार्द्धकार्षापणचतुष्टयंक्रमेण देयम्। दक्षिणास्तु षट्-द्वादशाष्टादश पणा देयाः। ज्ञानतो द्वैगुण्यम्॥

१ उक्तविध प्रायश्चित्तं वैश्यस्य दर्शयति-वैश्येति।

१ वैश्यस्वामिकैकहायनद्विहायनत्रिहायनगोसाक्षादबुद्धिपूर्वकवधे शूद्रस्य दिनद्वयव्रतम्। पादोनदिनचतुष्टयव्रतम्। पञ्चप्रहराधिकपञ्चदिनव्रतम्प्रायश्चित्तम्। (एकवर्षे गवि हते) इत्यादि (विप्रे तु सकलन्देयमि)त्यादिवृद्धप्रचेतोवृहद्विष्णुवचनाभ्याम्। तत्तद्व्रताकरणे द्वादशपणाः। सार्द्धकार्षापणम्। चतुष्पणाधिककार्षापणद्वयम्। दक्षिणा तु त्रिषट्नवपणरुपा देया। ज्ञानतो द्वैगुण्यम्॥

२ शूद्रस्वामिकैकहायनद्विहायनत्रिहायनगोसाक्षादबुद्धिपूर्वकवधे ३द्विजस्यार्द्धप्राजापत्यम्। एकप्राजापत्यम्। सार्द्धप्राजापत्यम्प्रायश्चित्तम्। [एकवर्षे गवि हते] इत्यादिवृद्धप्रचेतोवचनात्। तत्तद्व्रताकरणे सार्द्धकार्षापणम्। कार्षापणत्रयम्। सार्द्धकार्षापणचतुष्टयं क्रमेण देयम्। दक्षिणा तु यत्किञ्चित्। ज्ञानतो द्वैगुण्यम्॥

---

१ पूर्वोक्तं प्रायश्चित्तं शूद्रस्य दर्शयति-वैश्येति।

२ शूद्रस्वामिकैकवर्षादिगोवधे द्विजस्य प्रायश्चितमाह-शूद्रेति।

३ द्विजस्येति। ब्राह्मणक्षत्रियवैश्यानामित्यर्थः। जातिगतैकत्वविवक्षयादेकवचनम्।

१ शूद्रस्वामिकैकहायन-द्विहायनत्रिहायनगोसाक्षादबुद्धिपूर्वकबधे शूद्रस्य प्राजापत्यपादम्। अर्द्धप्राजापत्यम्। पादोनप्राजापत्यम्प्रायश्चित्तम्। [एकवर्षे गवि हते] इत्यादिबृद्धप्रचेतोवचनात्। तत्तद्वृताकरणे द्वादश—चतुर्विंशतिषट्त्रिंशत्पणाः क्रमेण देयाः। दक्षिणा तु यत्किञ्चित। ज्ञानतो द्वैगुण्यम्॥

२ एकप्रयत्नजनितब्राह्मणस्वामिकबव्हेकहा--यन—द्विहायन—त्रिहायन—गोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य द्वादशपणाधिकद्वादशकार्षापणदानम् सपादाष्टत्रिंशतकार्षापणदानम्प्रायश्चित्तम्। तथा च वृद्धप्रचेतोवचनम्—

---

१ उक्तविधप्रायश्चित्तं दर्शयति—शूद्रेति।

२ एकेति। एकप्रयत्नजनितेत्यस्य बधेऽन्वयः। एकप्रयत्नेन जनितो यो ब्राह्मणस्वामिकबव्हादिहायनगवां स्वकृतोऽज्ञानपूर्वको बधस्तत्रत्यर्थः।

१ एकवर्षे गवि हते कृच्छ्रपादो विधीयते ।
अबुद्धिपूर्वं पुंसः स्याद्द्विपादस्तु द्विहायने ।
त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परम् ॥

सम्वर्त्तः—

२ व्यापन्नानां बहूनां च रोधने बन्धनेपि वा ।
भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेत् ॥

बहूनामिति एकाधिकानामिति स्मार्ताः । अपिशब्दाद् गृहदाहादिपरिग्रहः । तेन साक्षाद्गृहदाहादिना वा रोधनेन भिषङ्मिथ्योपचारेण वा ॥

---

१ एकवर्षगोहनने पादकृच्छ्रस्यैकचरणः प्रायश्चित्तम् । कृच्छ्रपादलक्षणं यथा—

एकभुक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैवायं पादकृच्छ्रः प्रकीर्त्तितः । इति ।

द्विवर्षगोहनने तस्य द्वौ चरणौ । त्रिवर्षगोहनने त्रयश्चरणाः । अतः परं प्राजापत्यव्रतं प्रायश्चित्तमिति वचनाभिप्रायः ।

२ रोधने आवरणे । बन्धने रज्ज्वादिना संयमने । भिषङ्मिथ्योपचारे असत्यौषधकरणे । व्यापन्नानां मृतानाम् बहूनामेकाधिकानां गवां रोधनादिकर्ता द्विगुणं गोव्रतं चरेत् कुर्यादित्यर्थः ।

एकप्रयत्नजनितबहुबधे यादृशबधे यत्प्रायश्चित्तं तद्द्विगुणम्प्रायश्चित्तम् । तत्र [व्यापन्नानां बहूनामि] ति वचनमेव सर्वत्र हेतुः । दक्षिणात्र यथाशक्ति ॥

१ तादृशगोबधे क्षत्रियस्य नवपणाधिकनवकार्षापणदानम् । पणद्वयाधिकोनविंशतिकार्षापणदानम् । एकादशपणाधिकाष्टविंशतिकार्षापणदानम्प्रायश्चित्तम् । [एकवर्षे गवि हते]इत्यादि [व्यापन्नानां बहूनामि]त्यादिवृद्धप्रचेतस्सम्बर्तवचनाभ्याम् । ज्ञानतो द्वैगुण्यम् । दक्षिणा तु यथाशक्ति ॥

२ तादृशगोबधे वैश्यस्य षट्पणाधिकषट्कार्षापणदानम् । द्वादशपणाधिकद्वादशकार्षापणदानम् । पणद्वयाधिकोनत्रिंशत्कार्षापणदानम्प्रायश्चित्तम् । हेतुः पूर्ववत् । ज्ञानतो द्वैगुण्यम् । दक्षिणा यथाशक्ति ॥

---

१ उक्तविधप्रायश्चित्तं क्षत्रियस्य दर्शयितुमाह-तादृशगोबध इति ।

२ वैश्यस्य तथाविधं प्रायश्चित्तं दर्शयति-तादृशगोबध इति ।

१ शूद्रस्य तादृशगोवधे पणत्रयाधिककार्षापणत्रयदानम् । षट्पणाधिकषट्कार्षापणदानं प्रायश्चित्तम् । [एकवर्षे गवि हते] इत्यादि [व्यापन्नानां बहूनामि]त्यादिवृद्धप्रचेतस्सम्वर्तवचनाभ्याम् । ज्ञानतो द्वैगुण्यम् । दक्षिणातु यथाशक्ति॥

एकप्रयत्नजनितक्षत्रियस्वामिकबह्वेकहायन-द्विहायन-त्रिहायनगोसाक्षादबुद्धिपूर्वकवधे ब्राह्मणस्य नवाष्टादशसप्तविंशतिकार्षापणदानम्प्रायश्चित्तम् । पूर्ववद्धेतुः । ज्ञानतो द्वैगुण्यम् । दक्षिणा तु यथाशक्ति॥

तादृशगोवधे क्षत्रियस्य द्वादशपणाधिकषट्कार्षापणसार्द्धत्रयोदशकार्षापणचतुःपणाधिकविंशतिकार्षापणदानम्प्रायश्चित्तम् । पूर्ववद्धेतुः । वैश्यस्य सार्द्धचतुष्टयनवसार्द्धत्रयोदशकार्षापणदानम्प्रायश्चित्तम् । पूर्ववद्धेतुः । शूद्रस्य पणचतुष्टयाधिककार्षापणद्वयसार्द्धकार्षापणदानम्प्रायश्चित्तम् । पूर्ववद्धेतुः ।

१ शूद्रस्य प्रायश्चित्तं कथयति-शूद्रस्येति । सर्वेषामपि वर्णानां उक्तविधप्रायश्चित्ते वृद्धप्रचेतःसम्वर्तवचन एव हेतू बोध्ये ।

वैश्यस्वामिकबन्हेकहायनद्विहायनत्रिहायन गोसाक्षादबुद्धिपूर्वकवधे ब्राह्मणस्य षट्द्वादशाष्टादशकार्षापणदानं प्रायश्चित्तम् । पूर्ववद्धेतुः । क्षत्रियस्य सार्द्धचतुष्टयनवसार्द्धत्रयोदशकार्षापणदानम् । शूद्रस्य सार्द्धकार्षापणत्रयसार्द्धचतुष्टयकार्षापणसार्द्धचतुष्टयत्रयकार्षापणदानम्प्रायश्चित्तम् । सर्वत्र पूर्ववद्धेतुः ।

एकप्रयत्नजनितशूद्रस्वामिकबन्हेकहायनद्विहायनत्रिहायनगोसाक्षादबुद्धिपूर्वकवधे द्विजस्यैकद्वित्रिप्राजापत्यम् ।[एकवर्षे गवि हते]इत्यादि[व्यापन्नानां बहूनामि] त्यादि [कृच्छ्रांस्तु चतुरः कुर्यादि] त्यादि वृद्धप्रचेतस्समम्बर्तविश्वामित्रवचननिबन्धव्याख्यानेभ्यः । ज्ञानतो द्वैगुण्यम् ॥ तादृशव्रताकरणे त्रिषट्नवकार्षापणदानम्प्रायश्चित्तम् । शूद्रस्यार्द्धप्राजापत्यम् । सार्द्धप्राजापत्यम्प्रायश्चित्तम् । पूर्ववद्धेतुः ॥

ब्राह्मणस्वामिकैकहायनगोसाक्षादबुद्धिपूर्वक-

बधकर्तृबहुब्राह्मणानां प्रत्येकं सार्द्धकार्षापणदानम्प्रायश्चित्तम्। तथा च सम्बर्तः—

१ एका चेद्बहुभिः कापि दैवाद्व्यापादिता क्वचित्।
पादं पादं तु हत्यायाश्चरेयुस्ते पृथक् पृथक्॥

द्वयोर्बहूनाञ्च बधे पादद्वयं पादत्रयं प्रायश्चित्तम्। एका चेदित्यस्योपलक्षणपरत्वात्। ज्ञानपूर्वकबहुकर्तृकबधे तु प्रत्येकं सम्पूर्णं प्रायश्चित्तम्। दैवात् व्यापादिता भवेदित्यत्राऽकामादित्यर्थकस्य दैवादिति पदस्य स्वरसात्।

ब्राह्मणस्वामिकैकहायनगोद्वयसाक्षादबुद्धिपूर्वकबधकर्तृबहुब्राह्मणानां प्रत्येकं पणत्रयाधिककार्षापणत्रयं प्रायश्चित्तम्। [एका चेद्बहुभिः कापी] त्यादिसम्बर्तवचननिबन्धृव्याख्यानाभ्याम्।

---

१ एकेति। बहुभिः पुरुषैः काप्येका (उपलक्षणया) वत्साश्च गावो दैवादकमात् व्यापादिता मृताश्चेत् तदा हत्यायाः पादम्पादं प्रतिपादम् ते गोवधकर्तारो बहवो ब्राह्मणाः पृथक् २ सार्धपणाधिकसार्धकार्षापणदानम्प्रायश्चित्तं चरेयुः कुर्युरित्यर्थः।

ब्राह्मणस्वामिकवध्हेकहायनगोसाक्षादबुद्धिपूवकबधकर्तृबहुब्राह्मणानां प्रत्येकं सार्द्धचतुःपणाधिकसार्द्धकार्षापणचतुष्टयं प्रायश्चित्तम्। [एका चेद्बहुभिः कापी]त्यादिसम्बर्तवचननिबन्धृव्याख्यानाभ्याम्। एवमूहेन सर्वत्र बहुकर्तृके व्यवस्थापत्रं करणीयम्। बिस्तरभयान्नाभिहितमिति॥

ब्राह्मणस्वामिकचतुर्हायनादिगोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य गोदक्षिणाकसार्द्धमासिकव्रतं प्रायश्चित्तम्। तथा च मनुः—

१ उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत्
कृतवापो वसेद्गोष्ठे चर्मणा तेन सम्वृतः॥
२ चतुर्थकालमश्नीयादक्षारलवणं मितम्।
गोमूत्रेण चरेत्स्नानं द्वौ मासौ नियतेन्द्रियः॥

---

१ उपपातकेति। उपपातकसंयुक्तः उक्तविधोपपातकयुक्तः। कृतवापः कृतो वापो येन स कृतमुण्डन इत्यर्थः। चर्मणेति। गोचर्मावृतः सन्नित्यर्थः।

२ चतुर्थकालं चतुर्थप्रहरे। अक्षारलवणम् क्षारलवणरहितम्। मितं परिमितम् अल्पमिति यावत्। अश्नीयात् भक्षयेत्।

१ दिवानुगच्छेत्ता गास्तु तिष्ठन्नूर्ध्वं रजः पिबेत्
शुश्रुषित्वा नमस्कृत्वा रात्रौ वीरासनं वसेत् ॥
२ तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत।
आसीनासु तथाऽऽसीनो नियतो वीतमत्सरः॥
३ आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः।
पतितां पंकलग्नां वा सर्वप्राणैर्विमोचयेत।
४ उष्णे वर्षति शीते वा मारुते वाति वा भृशम्।
न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः।

---

१ तिष्ठन्नूर्ध्वमिति। तिष्ठन् स्थित्वा धूल्यावृते पथि चलन्त्या गोश्चरणोत्थां धूलिं मुखं व्यादाय गोघ्नः पिबेदित्यर्थः।

२ तिष्ठन्तीषु स्थितासु गोषु अनुतिष्ठेत् गोस्थित्यनन्तरं स्वयमपि स्थिरो भवेत्। व्रजन्तीषु गच्छन्तीषु तासु अनुगच्छेत् पश्चात्स्वयमप्यनुगमनं कुर्यात्। आसीनासु आसीनः उपविष्टः। नियतः संयमी। वीतमत्सरः। विगतामर्षः।

३ आतुराम् व्याधिताम् चौरव्याघ्रादिभिर्भयैश्चौरादिभयहेतुभिः अभिशस्तां आक्रान्ताम्। पतितां कूपादौ, पर्वतादिभ्यो भूमौ वेतिशेषः पङ्कलग्नां कर्दमलिप्तां गां सर्वप्राणैर्यथाशक्ति विमोचयेत् परित्रायेत।

४ उष्णे सूर्ये तपति सति। मेघे वर्षति सति। शीते चोपस्थिते सति। मारुते वायौ भृशमत्यर्थं वाति सतीत्यर्थः। शक्तितो यथाशक्ति गोस्त्राणमकृत्वा नात्मनस्त्राणं कुर्यादित्यर्थः।

आत्मनो यदिवाऽन्येषां गृहे क्षेत्रेऽथवा खले ।।
भक्षयन्तीन्न कथयेत् पिबन्तं चैव वत्सकम् ।
अनेन विधिना यस्तु गोघ्नो गामनुगच्छति ।।
स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति।।इति।

सम्वर्तः—

पूर्णे तु सार्द्धमासे तु साधुविप्रान्भोजयेद्द्विजः ।
भुक्तवत्सु च विप्रेषु गाम्वै दद्याद्विचक्षणः ।।
गवामभावे दातव्यं गोमूल्यं तु न संशयः ।

इति । सार्द्धमासिकव्रताकरणे सार्द्धपञ्चविंशतिकार्षापणं देयम् । दक्षिणा गोमूल्यं कार्षापणत्रयम् । ज्ञानपूर्वकबधे तु सवृषमेकादशगोदक्षिणाकं त्रैमासिकव्रतं प्रायश्चित्तम् ।

उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत् इत्यादि ।

१ वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः ।

---

१ वृषभेति । वृषभ एकादशो यासां ता गाः सुचरितव्रतः सम्यगनुष्ठितप्रायश्चित्तः ।

१ अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत ॥

इत्यन्तमनुवचनात् ।

स्यादकामकृते यत्तद्द्विगुणं बुद्धिपूर्वके ।

इत्याद्यङ्गिरोवचनाच्च । त्रैमासिकव्रते एकपञ्चाशत्कार्षापणाः । [वृषभैकादशगोमूल्यं पञ्चदशकार्षापणा इति शूलपाणिः] ।

ज्ञानपूर्वकत्वम्, [गोबधेच्छाविशिष्टेऽयं गौरि] तिज्ञानपूर्वकत्वम् । नातस्तादृशेच्छाविरहपूर्वके बधे ज्ञानपूर्वकत्वातिप्रसङ्गः । तादृशगोबधे क्षत्रियस्य सदक्षिणं पादोनसार्द्धमासिकव्रतं प्रायश्चित्तम् । [उपपातकसंयुक्तो गोघ्न] इत्यादि [पूर्णेतु सार्द्धमासे त्वित्यादि] (विप्रे तु सकलमि)त्यादि मनुसंवर्त बृहद्विष्णु वचनेभ्यः । पादोनसार्द्धमासिकव्रताकरणे पणद्वयाधिकोनविंशतिकार्षापणान्देयम् । दक्षिणा तु षट्त्रिंशत्पणरूपा । ज्ञानपूर्वकतादृशबधे पादोनत्रैमासिकव्रतम् । प्रागुक्तमनुबृहद्विष्णु वचनाभ्याम् ।

---

१ वेदविद्भ्योऽधीतवेदेभ्यो ब्राह्मणेभ्यो दद्यात् । अविद्यमाने तावति धनेऽसति सर्वस्वं तेभ्यो दद्यादित्यर्थः ।

१ ब्राह्मणस्वामिकचतुर्हायनादिगोसाक्षाद बुद्धिपूर्वकवधे वैश्यस्य २गोमूल्यार्द्धदक्षिणाकं सार्द्धद्वाविंशतिदिनव्रतं प्रायश्चित्तम् । [उपपातकसंयुक्त] इत्यादि [पूर्णे तु सार्द्धमासेत्वि] त्यादि [विप्रे तु सकलमि]त्यादिमनुसम्वर्तबृहद्विष्णुवचनेभ्यः । सार्द्धद्वाविंशतिदिनव्रताकरणे पादोनत्रयोदशकार्षापणन्देयम । दक्षिणा तु सार्द्धकार्षापणरूपा । सपादकादशदिनव्रताकरणे षट्पणाधिकषट्कार्षापणन्देयम् । द्वादशपणा दक्षिणाः ।

क्षत्रियस्वामिकचतुर्हायनादिगोसाक्षादबुद्धिपूर्वकवधे ब्राह्मणस्य यथाशक्तिदक्षिणाकत्रैमासिकव्रतं प्रायश्चित्तम् ।

३ गोघ्नः षण्मासांस्तच्चर्मणा परिवृतो गोग्रासहर्ता गोव्रतो यवाशी गोग्रासाहारो गोभिरनुसञ्च-

१ ब्राह्मणक्षत्रिययोः शुद्धिप्रकारमभिधाय साम्प्रतं विशःशुद्धिमभिदधाति ब्राह्मणस्वामिकेति ।

२ गोमूल्येति । गवाम्मूल्यं गोमूल्यं तस्याऽर्द्धं दक्षिणा यस्य व्रतस्य तादृशं व्रतमित्यर्थः ।

३ गोघ्न इति । गोघ्नो गोवधकः षण्मासान् षण्मासपर्यन्तम । तच्चर्मणा गोचर्मणा । परिवृत आच्छादितः । गोग्रासहर्ता गोग्रा-

रन् प्रमुच्यते। इति देवलवचननिबन्धृव्याख्यानाभ्याम्। त्रैमासिकव्रताऽकरणेऽष्टादशकार्षापणन्देयम्।

१ क्षत्रियस्वामिकचतुर्हायनादिगोसाक्षादबुद्धिपूर्वकबधे क्षत्रियस्य सार्द्धसप्तदिनाधिकद्विमासव्रतम्प्रायश्चित्तम्। वैश्यस्य सार्द्धमासिकव्रतं यथाशक्तिदक्षिणाकं प्रायश्चित्तम्। शूद्रस्य यथाशक्तिदक्षिणाकं सार्द्धद्वाविंशतिदिनव्रतम्प्रायश्चित्तम्। [गोघ्नः षण्मासांस्तच्चर्मणा परिवृत] इत्यादि [विप्रे तु सकलमि]त्यादि देवलबृहद्विष्णुवचनाभ्याम्। नि-

स्सम्पादकः। गोव्रती गोसेवनरूपव्रतधारी। यवाशी यवान्नाशनशीलः। गोग्रासाहारो गोग्रासपरिमिताऽऽहारकर्ता। गोभिः सह अनुसंचरन् व्रजन्। प्रमुच्यते त्यज्यते। गोबधपापादिति शेषः। इति देवलबचनाभिप्रायः। तथा च पद्यसंग्रहः-

गोचर्मणा परिवृतः खलु मासषट्कं
गोग्रासपूरणकरो वधको गवाञ्च।
गोसेवनव्रतधरश्च यवान्नभक्षी
गोग्रासभोजनकरोऽनुचरंश्च गोभिः॥ १॥
गोसेवनव्रतविधौ वधिना कृते तु
सम्मुच्यते च विधिनोक्तविधाद्धि पापात्।
इत्थं ब्रवीति वचनं वधकस्य शुद्ध्यै
बुद्ध्या विचिन्त्य मुनिरेष तु देवलाख्यः॥२॥

१ क्षत्रियस्वामिकगोबधे ब्रह्मशुद्ध्यभिधानोत्तरं क्षत्रशुद्धिरुच्यते क्षत्रियस्वामिकेति।

बन्धूज्यानाच्च । १ तेन क्षत्रियस्य सार्द्धत्रयोदशकार्षापणदानम् । वैश्यस्य नवकार्षापणम् । शूद्रस्य सार्द्धकार्षापणचतुष्टयम् ।

वैश्यस्वामिकचतुर्हायनादिगोसाक्षादबुद्धिपूर्वकवधे ब्राह्मणस्य गोदक्षिणाकमासव्रतम्प्रायश्चित्तम् । २ पञ्चगव्यं पिबेत् गोघ्नो मासेनाऽऽसीत संयतः । गोष्ठेशायी गोऽनुगामी गोप्रदानेन शुद्ध्यति ॥ इति याज्ञवल्क्यवचनात् । मासव्रते द्वादशकार्षापणम् । वैश्यस्वामिकचतुर्हायनादिगोसाक्षादबुद्धिपूर्वकवधे क्षत्रियस्य सार्द्धद्वाविंशतिदिनव्रतम् । वैश्यस्य पञ्चदशदिनव्रतम् । शूद्रस्य सार्द्धसप्तदिनव्रतम्प्रा-

---

१ तेनेति । ब्राह्मणापेक्षया क्षत्रादिदाने न्यूनतायां
विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम् ।
वैश्येऽर्द्धं पादशेषस्तु शूद्रजातिषु शस्यते ॥
इति वचनस्य हेतुत्वमवधेयम् ।

२ गोघ्नो गोवधकः । पञ्चगव्यं गोदुग्ध दधि घृतमूत्र गोमय रूपं वस्तु । मासेनासीतसंयतः मासं यावत् संयमी (जितेन्द्रियः) तिष्ठेत् । गोष्ठेशायी गावस्तिष्ठन्ति यत्र तत्र शयीत । गोऽनुगामी गोऽनुगमनशीलः । गोप्रदानेन गोदानं च कुर्यात् । तदा शुद्ध्यति-निष्पापो भवतीत्यर्थः ।

यश्चितम्। (पञ्चगव्यं पिवेत् गोघ्न) इत्यादि (विप्रे तु सकलन्देयमि)त्यादियाज्ञवल्क्यबृहद्विष्णुवचनाभ्याम्। तेन क्षत्रियस्य नव कार्षापणाः। वैश्यस्य षट् कार्षापणाः। शूद्रस्य त्रयः कार्षापणाः।

शूद्रस्वामिकचतुर्हायनादिगोसाक्षादबुद्धिपूर्वकबधे द्विजस्य प्राजापत्यद्वयम्। शूद्रस्य प्राजापत्यमेकम्प्रायश्चित्तम्। तथा च विश्वामित्रवचनं निबन्धृव्याख्यानञ्च—

१ कृच्छ्रांस्तु चतुरः कुर्याद्गोबधे बुद्धिपूर्वके।
अमत्या तु द्वयं कार्यं तदर्धं बालवृद्धयोः॥
स्त्रीशूद्रयोरेवमेतद्बधे चैव न संशयः।

बुद्धिपूर्वकतादृशबधे द्विजस्य प्राजापत्यचतुष्टयम्। शूद्रस्य प्राजापत्यद्वयम्। एकप्राजापत्ये धेनुरेका। तन्मूल्यकार्षापणत्रयम्वा। एवं द्विचतुष्कादावपि। दक्षिणाऽत्र यथाशक्ति।

१ बुद्धिपूर्वके ज्ञानपूर्वके। गोबधे गोहनने। चतुरःचतुः संख्यकान् कृच्छ्रान् सान्तपनाख्यान् कुर्यात्। अमत्या तु द्वयं कार्यम् अज्ञानेन गोबधे तु द्वौ कृच्छ्रौ कुर्यात्। बालवृद्धयोःतदर्धं कृच्छ्रद्वयार्द्धम् एकः कृच्छ्र इत्यर्थः। स्त्रीशूद्राभ्यामपि गोवधे एक एव कृच्छ्रो विधेयो नात्र कश्चन सन्देह इत्यर्थः।

साक्षात् गोवधप्रकारमाह आपस्तम्बः—

१ पाषाणै र्लगुडैर्वापि शस्त्रेणान्येन वा बलात्।
निपातयन्ति ये गास्तु तेषां सर्वं विधीयते ॥
मुष्टिचर्पटकीलैश्च तथा शृङ्गादिमोटनैः ।
लगुडादिप्रहारेण गोवधं तत्र निर्दिशेत् ॥

तथा—

२ हले च शकटे चैव दुर्बलं योऽभियोजयेत् ।
प्राणात्यये समुत्पन्ने ततः प्राप्नोति गोवधम् ॥

इति । अत्र पाषाणादिशब्द उपलक्षणमात्रम् । विषाग्निदाहादिनाऽपि साक्षाद्वधित्वमूहनीयमि] ति भवदेवः । तथा च प्रज्वालिताग्निना गोमरणेऽपि प्रज्वालकस्य साक्षाद्वधित्वमेव ।

---

१ पाषाणैः प्रस्तरैः।लगुडैर्दण्डैः।अन्येन शस्त्रेण खड्गादिना । बलात् हठात् । निपातयन्ति घातयन्ति । तेषां वधकानां सर्वं प्रायश्चित्तम् । शृङ्गादिमोटनैः । अत्रादिपदेन कर्णलांगूलादिग्रहणम् ।

२ यो नरो हले शकटे च दुर्बलं शक्तिहीनं रोगिणं गां (वृषभं) अभियोजयेत् वाहयेत् । तस्य प्राणात्यये प्राणविनाशे समुत्पन्ने जायमाने सति । ततो गोवधं गोवधजन्यपापं प्राप्नोति अभियोजक इति शेषः ।

तेन यत्स्वामिकसाक्षातगोवधे यस्य यत्प्रायश्चित्तं पूर्वमुक्तं प्रज्वालिताग्निना गोवधे प्रज्वालकस्य तस्य तदेव प्रायश्चित्तम्।

तत्र च व्यवस्थोच्यते—

शूद्रप्रज्वालिताग्निनाऽबुद्धिपूर्वकब्राह्मणस्वामिकैकहायनद्विहायनत्रिहायनगोवधेऽग्निप्रज्वालकस्य शूद्रस्य सार्द्धप्रहरोनदिनत्रयव्रतं पञ्चप्रहराधिकपञ्चदिनव्रतं सार्द्धप्रहरत्रयाधिकाष्टदिनव्रतं प्रायश्चित्तम्। [एकवर्षे गवि हते] इत्यादिवृद्धप्रचेतोवचनात्। १ तत्तद्व्रताकरणे सार्द्धपणाधिकसार्द्धकार्षापणम् पणत्रयाधिककार्षापणत्रयम्।सार्द्धचतुःपणाधिकसार्द्धपणचतुष्टयम्। क्रमेण देयम्। दक्षिणा तु त्रिषट् नवपणाः क्रमेण देयाः।

शूद्रप्रज्वालिताऽग्निनाऽबुद्धिपूर्वकक्षत्रियस्वामिकैकहायन-द्विहायन-त्रिहायन-गोवधेऽग्निप्रज्वाल

१ त.त्तद्व्रतस्य पूर्वोक्तव्रतत्रयस्याऽकरणेऽविधाने इत्यर्थः। तच्च सार्द्धप्रहरोनदिनत्रयरूपं प्रथमम्। पञ्चप्रहराधिकपञ्चदिनात्मकं द्वितीयम्। सार्द्धप्रहरत्रयाधिकाष्टदिनात्मकं च तृतीयम्। इदं च व्रतत्रयमेकहायनादिगोवधे क्रमेण प्रायश्चित्तत्वबोध्यम्॥

कशूद्रस्य १पञ्चप्रहराधिकपञ्चदिनव्रतम् । सपादैकादशदिनव्रतम् । प्रहरोनसप्तदशदिनव्रतम् । [एकवर्षे गवि हते] इत्यादि वृद्धप्रचेतोवचनात् ।

२ तत्तद्व्रताकरणे पणद्वयाधिकैककार्षापणम् । पणचतुष्टयाधिककार्षापणद्वयम् । षट्पणाधिककार्षापणत्रयं क्रमेण देयम् । दक्षिणा तु यत्किञ्चित् ।

वैश्यस्वामिकैकहायन–द्विहायन–त्रिहायनगोः प्रज्वालिताग्निनाऽबुद्धिपूर्वकबधेऽग्निप्रज्वालकशूद्रस्य १दिनद्वयव्रतम् । पादोनदिनचतुष्टयव्रतम् । पञ्चप्रहराधिकपञ्चदिनव्रतम्प्रायश्चित्तम् । (एकवर्षे गवि हते) इत्यादिवृद्धप्रचेतोवचनात् । तेन चतुर्विंशतिपणद्वादशपणषट्त्रिंशत्पणाः क्रमेण देयाः । दक्षिणा तु त्रिषट्-नवपणाः क्रमेण ॥

१ एकहायनगोवधे पञ्चप्रहराधिकपञ्चदिनात्मकं व्रतम् । द्विहायनगोबधे सपादैकादशदिनात्मकं व्रतम् । त्रिहायनगोबधे प्रहरोनसप्तदशदिनात्मकं व्रतम् ।

२ तत्तद्व्रतेति । पूर्वोक्तव्रतत्रयेत्यर्थः ।

१ एकहायनगोहनने दिनद्वयव्रतम् । द्विहायनगोहनने पादोन दिनचतुष्टयव्रतम् । त्रिहायनगोहतने पञ्चप्रहराधिकपञ्चदिनव्रतमिति क्रमेण बोध्यम् ।

शूद्रस्वामिकैकहायन-द्विहायन-त्रिहायन गोः प्रज्वालिताग्निनाऽबुद्धिपूर्वकबधेऽग्निप्रज्वालकशूद्रस्य प्राजापत्यपादम्। अर्द्धप्राजापत्यम्। पादोनप्राजापत्यं प्रायश्चित्तम्। [एकवर्षे गवि हते] इत्यादिवृद्धप्रचेतोवचनात्। तेन द्वादशचतुर्विंशतिषट्त्रिंशत्पणाः क्रमेण देयाः। दक्षिणा यत्किञ्चित्।

१ ब्राह्मणस्वामिकचतुर्हायनादिगोः प्रज्वालिताग्निनाऽबुद्धिपूर्वकबधेऽग्निप्रज्वालकशूद्रस्य सपादैकादशदिनव्रतं द्वादशपणदक्षिणाकं प्रायश्चित्तम्। [उपपातकसंयुक्त] इत्यादि [पूर्णे तु सार्द्धमासे त्वि] त्यादि [विप्रे तु सकलमि] त्यादिमनुसम्वर्तवृद्धविष्णुवचनेभ्यः। तेन षट्पणाधिकषट्कार्षापणदानम्।

क्षत्रियस्वामिकचतुर्हायनादिगोः प्रज्वालिताग्निनाऽबुद्धिपूर्वकबधेऽग्निप्रज्वालकशूद्रस्य सार्द्धद्वात्रिंशतिदिनव्रतं प्रायश्चित्तम्। [गोघ्नः षण्मासांस्त-

१ ब्रह्मक्षत्रविशां प्रायश्चित्तामिधानोत्तरं शूद्रस्य प्रायश्चित्तमभिधीयते-ब्राह्मणस्वामिकेति।

च्चर्मणा परिवृत] इत्यादि [विप्रे तु सकलमि] त्यादि देवलवृहद्विष्णुवचनाभ्याम् । तेन सार्द्धकार्षापणचतुष्टयदानम् ।

वैश्यस्वामिकचतुर्हायनादिगोः प्रज्वालिताऽग्निनाऽबुद्धिपूर्वकबधेऽग्निप्रज्वालकशूद्रस्य सार्द्धसप्तदिनव्रतं प्रायश्चित्तम् । १ [पञ्चगव्यं पिवेत् गोघ्न] इत्यादि (विप्रे तु सकलमि) त्यादि याज्ञवल्क्य वृहद्विष्णुवचनाभ्याम् । तेनकार्षापणत्रयन्देयम् ।

शूद्रस्वामिकचतुर्हायनादिगोः प्रज्वालिताग्निनाऽबुद्धिपूर्वकबधेऽग्निप्रज्वालकशूद्रस्य प्राजापत्यमेकं प्रायश्चित्तम् । (कृच्छ्रांस्तु चतुरः कुर्यादि) त्यादि विश्वामित्रवचननिबन्धृव्याख्यानाभ्याम् ।

---

१ पञ्चगव्यमिति । पञ्चगव्यलक्षणं यथा—

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
निर्दिष्टं पञ्चगव्यं तु प्रत्येकं कायशोधनम् ॥

तत्र विशेषः—

गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चापि गोमयम् ।
पयः काञ्चनवर्णायाः नीलायाश्च तथा दधि ॥
घृतं च कृष्णवर्णायाः सर्वं कापिलमेव वा ।
अलाभे सर्ववर्णानां पञ्चगव्येष्वयं विधिः ॥

एवं ब्राह्मणक्षत्रियवैश्यप्रज्वालिताग्निना ब्राह्मणादिस्वामिकगोबधे साक्षात् गोबधोक्तरीत्योहेन व्यवस्थापत्रं लेख्यमिति।

ब्राह्मणस्वामिकगर्भिण्यादिगोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य वृषभैकादशगोदक्षिणाकत्रैमासिकव्रतं प्रायश्चित्तम्।

१गर्भिणीं कपिलां दोग्ध्रीं कामधेनुं च सुव्रताम्
रोधादिना घातयित्वा द्विगुणं गोव्रतं चरेत्॥

इति बृहस्पतिवचनात्। त्रैमासिकव्रते एकपञ्चाशत्कार्षापणदानम्। वृषभैकादशगोमूल्यं पञ्चदश कार्षापणाः। ज्ञानपूर्वकतादृशबधे षाण्मासिकव्रतं त्रिंशत्कार्षापणदक्षिणाकं प्रायश्चित्तम्। [गर्भिणीं कपिलां दोग्ध्रीमि] त्यादि (द्विगुणे तु व्रते चीर्णे द्विगुणा दक्षिणा भवेत) इति बृहस्पतिहारीतवचनाभ्याम्।

---

१ गर्भिणीमिति। गर्भिणीं गर्भयुक्ताम्। कपिलां कपिलवर्णाम्। दोग्ध्रीम् अधिकदुग्धवतीम्। कामधेनुं गाम्। सुव्रताम् सुस्वभावाम्। रोधादिना अवरोधादिना। आदिपदेन दण्डादिना। घातयित्वा विनाश्य द्विगुणं गोव्रतं चरेत्। कुर्यात्। इत्यर्थः।

ब्राह्मणस्वामिकगर्भिणीगोसाक्षादबुद्धिपूर्वकबधे क्षत्रियस्य पादोनत्रैमासिकव्रतं चतुःपणाधिकैकादशकार्षापणदक्षिणाकं प्रायश्चित्तम् । वैश्यस्य सार्द्धसप्तकार्षापणदक्षिणाकसार्द्धमासिकव्रतम् । शूद्रस्य चतुःप्रहराधिकद्वाविंशतिदिनव्रतं पादोनकार्षापणदानम् । शूद्रस्य पादोनत्रयोदशकार्षापणदानं पूर्वोक्तदक्षिणादानं च । ज्ञानतस्तादृशवधे पूर्वोक्तप्रायश्चित्ताद् १ द्वैगुण्यम् ।

क्षत्रियस्वामिकगर्भिण्यादिगोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य यथाशक्ति दक्षिणाकं षाण्मासिकव्रतम्। क्षत्रियस्य सार्द्धमासचतुष्टयव्रतम् । वैश्यस्य त्रैमासिकव्रतम् । शूद्रस्य सार्द्धमासिकव्रतं प्रायश्चित्तम् । (गर्भिणां कपिलां दोग्ध्रीमि) त्यादि बृह-

---

१ द्वैगुण्यमिति । ज्ञानपूर्वकबधे ब्राह्मणस्य द्वाविंशतिगोदक्षिणाकं षाण्मासिकव्रतम् । क्षत्रियस्य पञ्चदशदिनाधिकमासषट्चकव्रतम् अष्टपणाधिकद्वाविंशतिकार्षापणदक्षिणाकं व्रतम् । वैश्यस्य पञ्चदशकार्षापणदक्षिणाकं त्रैमासिकव्रतम् । शूद्रस्याऽष्टप्रहराधिकचतुश्चत्वारिंशद्दिनव्रतम् । अष्टपणाधिककार्षापणदानं अष्टपणाधिकचतुर्विंशतिकार्षापणदानं चेत्थं द्वैगुण्यम्बोध्यम् ।

स्पतिवचनात् । षण्मासिकव्रताकरणे षट्त्रिंशत्कार्षापणदानम् । सार्द्धमासचतुष्टयव्रताकरणे सप्तविंशतिकार्षापणदानम् । त्रैमासिकव्रताकरणे अष्टादश कार्षापणदानम् । सार्द्धमासिकव्रताकरणे नवकार्षापणदानम् । दक्षिणा तु सर्वेषां यथाशक्ति । ज्ञानतो द्वैगुण्यम् ।

वैश्यस्वामिकगर्भिण्यादिगोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य सदक्षिणं द्विमासव्रतम् । क्षत्रियस्य सदक्षिणं सार्द्धमासिकव्रतम् । वैश्यस्य सदक्षिणं मासव्रतम् । शूद्रस्य सदक्षिणमर्द्धमासव्रतं प्रायश्चित्तम् । (गर्भिणीं कपिलां दोग्ध्रीमि) त्यादि बृहस्पतिवचनात् । द्विमासव्रताकरणे चतुर्विंशतिकार्षापणदानम् । दक्षिणा च गोद्वयमूल्यं षट्कार्षापणम् । सार्द्धमासिकव्रताकरणे अष्टादशकार्षापणदानम् । दक्षिणा च सार्द्धकार्षापणचतुष्टयम् । मासव्रताकरणे द्वादशकार्षापणदानम् । दक्षिणा च गोमूल्यं कार्षापणत्रयम् । अर्द्धमासिकव्रताकरणे षट्कार्षापणदानम् ।

दक्षिणा च मार्द्धकार्षापणम्। १ज्ञानतो द्विगुणव्रतं द्विगुणदक्षिणाकम्। (स्यादकामकृते यत्तदि) त्यादि [द्विगुणे तु व्रते चीर्णे) इत्याद्यङ्गिरोहारीतवचनाभ्याम्।

शूद्रस्वामिकगर्भिण्यादिगोसाक्षादबुद्धिपूर्वकबधे द्विजस्य प्राजापत्यचतुष्टयम्। शूद्रस्य प्राजापत्यद्वयं प्रायश्चित्तम्। (गर्भिणीं कपिलां दोग्ध्रीमि) त्यादि बृहस्पतिवचनात्। प्राजापत्यचतुष्टयाकरणे धेनुचतुष्टयं तन्मूल्यं द्वादशकार्षापणं वा देयम्। प्राजापत्यद्वयाकरणे धेनुद्वयम् तन्मूल्यं षट्कार्षापणं वा

१ज्ञानत इति। व्रते द्वैगुण्यं यथा-ब्राह्मणस्य सदक्षिणं मासचतुष्टयव्रतम्। क्षत्रियस्य सदक्षिणं त्रैमासिकव्रतम्। वैश्यस्य सदक्षिणं मासद्वयव्रतम्। शूद्रस्य सदक्षिणं मासव्रतम्। दाने च यथा-ब्राह्मणस्य मासचतुष्टयव्रताकरणेऽष्टचत्वारिंशत्कार्षापणदानं दक्षिणागोचतुष्टयमूल्यं द्वादशकार्षापणम्। क्षत्रियस्य त्रैमासिकव्रताकरणे-षट्त्रिंशत्कार्षापणदानम्-दक्षिणा च नवकार्षापणम्। वैश्यस्य द्विमासव्रताकरणे चतुर्विंशतिकार्षापणदानम्-दक्षिणा गोमूल्य षट्कार्षापणम्। शूद्रस्य मासिकव्रताकरणे द्वादशकार्षापणदानं दक्षिणा कार्षापणत्रयम्।

देयम्। १ज्ञानतो द्वैगुण्यम्। दक्षिणाऽत्र यथाशक्ति॥

उत्पन्नमात्रब्राह्मणस्वामिकगोगर्भसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य षट्पणाधिकषट्कार्षापणदानं प्रायश्चित्तम्। गात्रसम्मितगर्भबधे द्वादशपणाधिकद्वादशकर्षापणदानम्। अचेतनगर्भबधे पणद्वयाधिकोनविंशतिकार्षापणदानम्। चैतन्ययुक्तगर्भबधे सार्द्धपञ्चविंशतिकार्षापणदानम्।

२ पादमुत्पन्नमात्र तु द्वौ पादौ गात्रसम्मिते।
पादोनं व्रतमाचष्टे हत्वा गर्भमचेतनम्॥ इति॥

अर्थाच्चैतन्ययुक्तगर्भघाते कृत्स्नमेव प्रायश्चित्तमूहनीयमिति मनुवचनभवदेवव्याख्यानाभ्याम्।

---

१ ज्ञानतो द्वैगुण्यमिति। ब्रह्मक्षत्रविशां प्राजापत्यचतुष्टयम् एतदभावेऽष्टधेनुदानं तन्मूल्यचतुर्विंशतिकार्षापणदानं वा। शूद्रस्य प्राजापत्यचतुष्टयम्। एतदभावे धेनुचतुष्टयं तन्मूल्यद्वादशकार्षापणम्वा देयम्।

२ पादमिति। उत्पन्नमात्रे उत्पन्नमात्रगोगर्भे हते सति पादं चरणैकम्प्रायश्चित्तम्। गात्रसम्मिते तद्युक्तगोगर्भे हते सति द्वौ पादौ। अचेतनं चैतन्यशून्यं गर्भं हत्वा विनाश्य पादोनं व्रतम् अर्थात् त्रयः पादाः। चेतने गोगर्भे हते तु सर्वम्प्रायश्चित्तम्। अर्थात् चत्वारः पादाः।

उत्पन्नमात्रब्राह्मणस्वामिकगोगर्भसाक्षादबुद्धिपूर्वकबधे क्षत्रियस्य सार्द्धचतुःपणाधिकसार्द्धचतुष्टयकार्षापणदानम्। गात्रसम्मितगर्भबधे नवपणाधिकनवकार्षापणदानम् चैतन्यशून्यतादृशगर्भबधे सार्द्धपञ्चपणाधिकचतुर्दशकार्षापणदानम्। चैतन्ययुक्तादृशगर्भबधे पणद्वयाधिकोनविंशतिकार्षापणन्देयम्। ज्ञानतो द्वैगुण्यम्।

उत्पन्नमात्रब्राह्मणस्वामिकगोगर्भसाक्षादबुद्धिपूर्वकबधे वैश्यस्य पणत्रयाधिककार्षापणत्रयन्देयम्। गात्रसम्मितगर्भबधे षट्पणाधिकषट्कार्षापणदानम्। चैतन्यशून्यगर्भबधे नवपणाधिकनवकार्षापणदानम्। चैतन्ययुक्तगर्भबधे द्वादशपणाधिकद्वादशकार्षापणदानं प्रायश्चित्तम् (पादमुत्पन्नमात्रेत्वि) त्यादि वृद्धमनुवचन—भवदेवव्याख्यानाभ्याम्।

उत्पन्नमात्रब्राह्मणस्वामिक गोगर्भसाक्षादबुद्धि पूर्वकबधे शूद्रस्य सार्द्धपणाधिकसार्द्ध कार्षापणदानम्। गात्रसम्मितगर्भबधे पणत्रयाधिककार्षापणत्रयदानम्। चैतन्यशून्यगर्भबधे सार्द्धचतुःपणाधिकसार्द्ध-

कार्षापणचतुष्टयं प्रायश्चित्तम्। [पादमुत्पन्नमात्रे त्वि] त्यादि वृद्धमनुवचन भवदेवव्याख्यानाभ्याम्।

१ ज्ञानतो द्वैगुण्यम्।

उत्पन्नमात्रक्षत्रियस्वामिकगोगर्भसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य सार्द्धकार्षापणचतुष्टयम्। गात्रसम्मितगर्भबधे नवकार्षापणम्। चैतन्यशून्यगर्भबधे सार्द्धत्रयोदशकार्षापणम्। चैतन्ययुक्तगर्भबधेऽष्टादशकार्षापणम्। उत्पन्नमात्रगर्भसाक्षादबुद्धिपूर्वकबधे क्षत्रियस्य षट्पणाधिककार्षापणत्रयम्। गात्रसम्मितगर्भबध द्वादशपणाधिकषट्कार्षापणम्। चैतन्यशून्यगर्भबधे पणद्वयाधिकदशकार्षापणम्। चैतन्ययुक्तगर्भबधे सपादकार्षापणद्वयम्। गात्रसम्मितगर्भबधे सार्द्धकार्षापणचतुष्टयम्। चैतन्यशून्यगर्भबधे पादोनसप्तकार्षापणम्। चैतन्ययुक्तगर्भबधे नवका-

१ ज्ञानत इत। ज्ञानपूर्वकतादृशबधे कृते सतीत्यर्थः। द्वैगुण्य मिति। द्विगुणं प्रायश्चित्तमित्यर्थः। तथाहि-उत्पन्नमात्रे-पणत्रयाधिककार्षापणत्रयम्॥ गात्रसम्मिते-षट्पणाधिकषट्कार्षापणम्। चैतन्यशून्ये नवपणाधिकनवकार्षापणम्।

र्षापणं प्रायश्चित्तम् । शूद्रस्योत्पन्नमात्रगर्भबधे पण-द्वयाधिकैककार्षापणम् । गात्रसम्मितगर्भबधे पणचतुष्टयाधिककार्षापणद्वयम् । चैतन्यशून्यगर्भबधे षट्पणाधिककार्षापणत्रयम् । चैतन्ययुक्तगर्भबधे सार्द्धकार्षापणचतुष्टयं प्रायश्चित्तम् । (पादमुत्पन्नमात्रेत्वि) त्यादि वृद्धमनुवचन—भवदेवव्याख्यानाभ्याम् ।

उत्पन्नमात्रवैश्यस्वामिकगोगर्भस्रावादबुद्धिपूर्वकबधे ब्राह्मणस्य कार्षापणत्रयम् । गात्रसम्मितगर्भबधे षट्कार्षापणम् । चैतन्यशून्यगर्भबधे नवकार्षापणम् । चैतन्ययुक्तगर्भबधे द्वादशकार्षापणम् । क्षत्रियस्योत्पन्नगर्भबधे सपादकार्षापणद्वयम् । गात्रसम्मितगर्भबधे सार्द्धकार्षापणचतुष्टयम् । चैतन्यशून्यगर्भबधे पादोनसप्तकार्षापणम् । चैतन्ययुक्तगर्भबधे नवकार्षापणम् । वैश्यस्योत्पन्नमात्रगर्भबधे सार्द्धकार्षापणम् । चैतन्यशून्यगर्भबधे सार्द्धकार्षापणचतुष्टयम् । चैतन्युक्तगर्भबधे षट्कार्षापणम् । शूद्रस्योत्पन्नमात्रगर्भबधे द्वादशकार्षापणम् । गात्रसम्मितगर्भबधे सार्द्धचतुर्विंशतिकार्षापणम् । चैतन्यशून्यबधे चतुष्पणाधिकका-

र्षापणद्वयम्। चैतन्ययुक्तगर्भबधे कार्षापणत्रयं प्रायश्चित्तम्।(पादमुत्पन्नमात्रे त्वि)त्यादिवृद्धमनुवचनभवदेवव्याख्यानाभ्याम्।

उत्पन्नमात्रशूद्रस्वामिकगोगर्भसाक्षादबुद्धिपूर्वकबधे द्विजस्यार्द्धं प्राजापत्यम्। गात्रसम्मितगर्भबधे एकप्राजापत्यम्। चैतन्यशून्यगर्भबधे सार्द्धप्राजापत्यम्। चैतन्ययुक्तगर्भबधे प्राजापत्यद्वयम्॥ शूद्रस्योत्पन्नमात्रगर्भबधे प्राजापत्यपादम्। गात्रसम्मितगर्भबधेऽर्द्धप्राजापत्यम्। चैतन्यशून्यगर्भबधे पादोनप्राजापत्यम्। चैतन्ययुक्तगर्भबधे एकप्राजापत्यम्। (पादमुत्पन्नमात्रे त्वि)त्यादि वृद्धमनुवचन-भवदेव व्याख्यानाभ्याम्। उत्पन्नमात्रः सार्द्धमासद्वयपर्यन्तम्। तदूर्ध्वं पञ्चमासपर्यन्तं गात्रसम्मितः। तदूर्ध्वं सार्द्धसप्तमासपर्यन्तं चैतन्यशून्यः। तदूर्ध्वं चैतन्ययुक्त इति॥

ब्राह्मणस्वामिकातिवृद्धादिगोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य गोमूल्यार्द्धदक्षिणाकत्रयोदशकार्षापणदानम्। क्षत्रियस्याऽष्टादशपणदक्षिणाकनवप-

णाधिकनवकार्षापणदानम् । वैश्यस्य द्वादशपणदक्षिणाकषट्पणाधिकं षट्कार्षापणदानम् । शूद्रस्य षट्पणदक्षिणाकपणत्रयाधिककार्षापणत्रयदानम्प्रायश्चित्तम् ।

तथा च बृहस्पतिवचनम्—

१ अतिवृद्धामतिकृशामतिबालां च रोहिणीम् ।
हत्वा पूर्वविधानेन चरेदर्धव्रतं द्विजः ॥ इति ॥

अतिवृद्धा तृणभक्षणाऽसमर्था । अतिकृशा दोहनवाहनाद्ययोग्या । अतिबाला द्विवर्षवयस्का तथा च वचनम्—

२ वर्षमात्रा तु बाला स्यादतिबाला द्विवार्षिका ।

---

१ अतिवृद्धातिति । अतिवृद्धाम् गमनाद्यसमर्थाम् । अतिकृशाम् अधिकदुर्बलाम् । अतिबालाम् द्विवर्षवयस्काम् । रोगिणीम् व्याधिपीडितम् । गामिति शेषो बोध्यः । हत्वा विनाश्य पूर्वविधिना मन्वाद्युक्तविधिना द्विजोऽर्द्धव्रतं चरेत् कुर्यात् । द्विज इति वर्णचतुष्टय स्योपलक्षणम् । जात्यभिप्रायेणैकवचनम् ।

२ वर्षमात्रेति । वर्षं प्रमाणमस्या वर्षमात्रा प्रमाणेऽर्थे वर्षशब्दान्मात्रच्प्रत्ययः । एकवर्षवयस्केत्यर्थः । द्विवार्षिकी—वर्षद्वयवयस्का अतः परं सा गौरिति संज्ञां लभते । दन्तजन्मनि पूर्वदन्तगलितानन्तरं पुनर्दन्तप्ररोहे सतीत्यर्थः । सा तरुणीत्युच्यते ।

अतः परन्तु सा गौः स्यात्तरुणी दंतजन्मनि ॥
इति द्विज इत्युपलक्षणम्।

क्षत्रियस्वामिकातिवृद्धादिगोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य नवकार्षापणदानम्। क्षत्रियस्य द्वादशपणाधिकषट्कार्षापणदानम्। वैश्यस्य सार्द्धकार्षापणचतुष्टयम्। शूद्रस्य सपादकार्षापणद्वयं प्रायश्चित्तम्। (अतिवृद्धामतिकृशामि)त्यादि वृहस्पतिवचनात्। दक्षिणा यथाशक्ति।

वैश्यस्वामिकातिवृद्धादिगोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य गोमूल्यार्द्धदक्षिणाकषट्कार्षापणदानम्। क्षत्रियस्याऽष्टादशपणदक्षिणाकसार्द्धकार्षापणचतुष्टयम्। वैश्यस्य द्वादशपणदक्षिणाककार्षापणत्रयम्। शूद्रस्य षट्पणदक्षिणाकसार्द्धकार्षापणदानं प्रायश्चित्तम्। (अतिवृद्धामि) त्यादि वृहस्पतिवचनात्।

शूद्रस्वामिकातिवृद्धादिगोसाक्षादबुद्धिपूर्वकबधे द्विजस्य कार्षापणत्रयम्। शूद्रस्य सार्द्धकार्षापणं प्रायश्चित्तम्। (अतिवृद्धामि)त्यादिवहस्पतिव-

चनात । दक्षिणाऽत्र यथाशक्ति । यत्स्वामिकगोबधे यस्य यत्प्रायश्चित्तं तत्स्वामिकोन्मत्तादिगोबधे तत्पादं तस्य प्रायश्चित्तम् ।

तथाच मनुवचनम्—

१क्लान्तमज्ञानमुन्मत्तं प्रमत्तं व्याधिपीडितम्
अन्धं बालं तमोरूढं हत्वा पादं समाचरेत् ॥इति॥

अत्र विशेषतो व्यवस्थोहेन कार्या ॥

ब्राह्मणस्वामिकैकाधिकचतुर्हायनादिगोसाक्षादबुद्धिपूर्वकैकप्रयत्नजनितबधे ब्राह्मणस्य गोद्वयदक्षिणाकमेकपञ्चात्कार्षापणदानं प्रायश्चित्तम् । क्षत्रियस्य सार्द्धकार्षापणचतुष्टयदक्षिणाकं चतुःपणाधिकाष्टत्रिंशत्कार्षापणदानम् ।

वैश्यस्य गोदक्षिणाकसार्द्धपञ्चविंशतिकार्षापणदानम् । शूद्रस्य सार्द्धकार्षापणदक्षिणाकद्वादशपणा

१ क्लान्तमिति । क्लान्तं खेदयुक्तम् । अज्ञानं ज्ञानशून्यम् । उन्मत्तं मतिभ्रान्तम् । प्रमत्तं मद्यपायिनम् । व्याधिपीडितं शेषयुक्तम् अन्धं हीनचक्षुषम् । बालं शिशुम् । प्रकृते गामिति शेषो बोध्यः । हत्वा पादं समाचरेत् । अर्थात्क्लान्तादिगोबधे वधकः पादैकं प्रायश्चित्तं कुर्यादित्यर्थः ।

धिकद्वादशकार्षापणदानं प्रायश्चित्तम् ।

१ व्यापन्नानां बहूनाञ्च रोधने बंधनेपि वा
भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेत् ॥

इति संवर्तवचनात् ॥

२ क्षत्रियस्वामिकैकाधिकचतुर्हायनादिगोसाक्षादबुद्धिपूर्वकैकप्रयत्नजनितवधे ब्राह्मणस्य षट्त्रिंशत्कार्षापणदानम् । क्षत्रियस्य सप्तविंशतिकार्षापणदानम् । वैश्यस्याष्टादशकार्षापणदानम् । शूद्रस्य नवकार्षापणदानं प्रायश्चित्तम् [व्यापन्नानां बहूनामि] त्यादिसंवर्तवचनात् । दक्षिणा तु यथाशक्ति ।

३ वैश्यस्वामिकैकाधिकचतुर्हायनादिगोसाक्षादबुद्धिपूर्वकबधे ब्राह्मणस्य गोद्वयदक्षिणाकचतु-

१—अवरोधसंयमनासत्यौषधिविधानद्वारा मृतासु बन्हीषु गोषु अवरोधादिकर्त्रा पुंसा द्विगुणं गोव्रतम् (प्राजापत्यरूपम्) विधेयमित्यर्थः । चतुर्हायनादिगोवधे प्राजापत्यरूपगोव्रतस्यैव वृद्धप्रचेतसाभिहितत्वात् । तच्च (एकयर्षे इत्यादि प्राजापत्यमतः परमित्यन्तम्)

२—क्षत्रियस्वामिकतादृशगोवधे वर्णचतुष्टयस्य प्रायश्चितमाह—क्षत्रियस्वामिकेति ।

३—वैश्यस्वामिकतादृशगोवधे सर्वेषां प्रायश्चित्तमाह—वैश्यस्वामिकेति ।

र्विंशतिकार्षापणदानम् । क्षत्रियस्य सार्द्धकार्षापण-चतुष्टयदक्षिणाकाष्टादशकार्षापणदानम् । वैश्यस्य सपादकार्षापणद्वयदक्षिणाकं द्वादशकार्षापणदानम् । शूद्रस्याष्टादशपणदक्षिणाकषट्कार्षापणदानं प्राय श्चित्तम् । [व्यापन्नानां बहूनामि]तिसंवर्त-वचनात् ।

१ शूद्रस्वामिकैकाधि कचतुर्हायनादिगोसाक्षा-दबुद्धिपूर्वकैकप्रयत्नजनितवधे द्विजस्य प्राजापत्य-चतुष्टयं शूद्रस्य प्राजापत्यद्वयं प्रायश्चित्तम् (व्याप-न्नानां बहूनामि) त्यादि सम्वर्त्तवचनात् । दक्षिणा यथाशक्ति ॥ [अपिशब्दात् गृहदाहादिनेति गोपा-लः] । रोधनबन्धननिमित्तकैकाधिकचतुर्हायनीवधे पीयमेव व्यवस्था ॥

यत्कर्तृकगोवधे यत्प्रायश्चित्तं तज्जातीयबहु-कर्तृकैकगोवधे बहूनां प्रत्येकं तत्प्रायश्चित्तपादं गो-द्वयवधे प्रत्येकं द्विपादं गोत्रयवधे प्रत्येकं सर्वेषां त्रिपादं प्रायश्चित्तम् (एका चेदि) त्यादिवचनात् ॥

१—शूद्रस्वामिकतादृशगोवधे चतुर्णां प्रायश्चित्तमाह—शूद्र-स्वामिकेति ।

यथा बहुब्राह्मणस्वामिकैकचतुर्हायनादिगोसाक्षादबुद्धिपूर्वकबधे बहूनान्तेषां प्रत्येकं षट्कार्षापणदानं गोद्वयवधे प्रत्येकं द्वादशपणाधिकद्वादशकार्षापणदानं गोत्रयबधे पणद्वयाधिकैकोनविंशतिकार्षापणदानं प्रत्येकं प्रायश्चित्तम् [एका चेद्बहुभिः कापीत्यादि] संवर्तवचनात् ॥ एवमूहेन सर्वत्र व्यवस्था कर्तव्या ॥ बुद्धिपूर्वकबधे तु प्रत्येकं सम्पूर्णप्रायश्चित्तं सर्वेषामेव न तत्रपादः । अकामार्थकदैवपदश्रवणात्

अस्थिलांगूलादिभंगानंतरषण्मासपर्यन्तं गोजीवनेऽस्थिलांगूलादिभंगकर्तृणां ब्राह्मणादिचतुर्णां प्रजापत्यमेकं प्रयश्चितम् ।

१ कर्णलांगूलयोश्छेदमस्थिभंगं विधाय च ।
प्राजापत्यव्रतं कुर्युश्चत्वारो ब्राह्मणादयः ।
इतिगोभिलवचनात् । प्राजापत्यव्रताकरणे एकधेनुदानं कार्षापणत्रयदानं वा ।

१–गोः कर्णलांगूलयोश्छेदनकर्तारः अस्थिभङ्गकर्तारश्च ब्राह्मण क्षत्रियवैश्यशूद्राः एकप्राजापत्यव्रतभागिनो भवन्तीत्यर्थः ।

अस्थिभंगानन्तरं षण्मासाभ्यन्तरे गोमरणे तु पूर्वोक्तं स्वामिभेदेन कर्तृभेदेन वा यत्सम्पूर्णप्रायश्चित्तं यस्य तस्य तदेव कर्तव्यं व्यवस्थापत्रं तदनुसारेणैव तत्र, न तु तत्रास्थिभंगादिनिमित्तकमपि पृथक्प्रायश्चित्तं षण्मासाभ्यन्तरे मरणे तु सम्पूर्णप्रायश्चित्तकरणेनाऽधिकांगेन शृङ्गभंगादिप्रायश्चित्तसिद्धिरिति स्मार्तलिखनात्। षण्मासानन्तरं मरणेऽपि वधप्रायश्चित्तन्नास्ति किन्तु अस्थिभंगादिनिमित्तकमात्रम्।

१ शृङ्गभंगेऽस्थिभंगे च कटिभंगे तथैव च।

यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते। इतियमवचनात। प्रायश्चित्तमिति वधनिमित्तकप्रायश्चित्तमित्यर्थः न तु अस्थिभङ्गादिनिमित्तकप्रायश्चित्तं नेत्यर्थः। अन्यथा (कर्णलांगूलयोश्छेदमि)ति गोभिलवचनस्य निर्विषयत्वापत्तिः॥ वृषा-

१ शृंगास्थिकटिभंगकरणे षण्मासोत्तरं गोर्मरणे शृंगादिभंगकर्तुर्वधनिमित्तकं प्रायश्चित्तं नास्तीति तदर्थः। भङ्गनिमित्तकप्रायश्चित्तं तु भवत्येवेति बोध्यम्। अन्यथोक्तगोभिलोक्तं वचनं निर्विषयं स्यात्।

एडच्छेदनकर्तुर्ब्राह्मणस्य स्वामिभेदेन पूर्वोक्तरीत्या गोवधप्रायश्चित्तं प्रयोजकस्य सम्पूर्णप्रायश्चित्तार्द्ध-प्रायश्चित्तम् ।

१ मुष्कमोषकरो विप्रो गोवधस्य व्रतञ्चरेत् ।
प्रयोजकस्तु कुर्वीत व्रतस्यार्द्धं विशुद्धये ॥

इति गोभिलवचनात् ॥

मुष्कमोषकरो वीजकोषनाशकरः । एतच्चा-एडच्छेदनमात्रेण नत्वत्र वधापेक्षा अएडच्छेदनप्रयुक्त-वधे तु ब्राह्मणादिचतुर्णामपि प्रागुक्तास्थिभंगादिनि-मित्तकमेव प्रायश्चित्तं तदनुसारेणैव व्यवस्था कार्ये-त्यलं बहुना ॥

हलादिशकटादिना स्वयं वृषवाहकब्राह्मणस्य प्राजापत्यद्वयम् । योषितगोवाहकानां ब्राह्मणादिच-तुर्णां प्राजापत्यचतुष्टयं प्रायश्चित्तम् ।

---

१ यो विप्रः मुष्कमोषकरो वीजकोषविनाशकः स गोवधस्य प्रायश्चित्तं (प्राजापत्यरूपं) कुर्यात् । यः खलु तत्र प्रयोजकः प्रेरकः स तु विशुद्धये आत्मशुद्धयर्थं व्रतस्यार्द्ध° अर्द्ध° प्रायश्चित्तमित्यर्थः कुर्वीत् विदध्यात् ।

१ हले वा शकटेवापि वाहयेत् यो वृषं स्वयम् ।
प्राजापत्यद्वयं कुर्यादद्विगुणं योषितं गवाम् ।
इति गोभिलवचनात् । अकामत इदम् । कामतो द्वे गुणयम् ।

ज्ञानतो हलादावुत्सृष्टवृषयोजकस्य ब्राह्मणस्य चान्द्रायणद्वयं प्रायश्चित्तम् ।

२ वृषभं वा समुत्सृष्टं कपिलाम्वापि कामतः ।
योजयित्वा हलैः कुर्य्याद्व्रतं चान्द्रायणद्वयम् ।
इतिगोभिलवचनात् । समुत्सृष्टंश्राद्धोत्सृष्टं चान्द्रायणद्वये पञ्चदश धेनवः । अज्ञानतोऽर्द्धम् । क्षत्रियादीनां पादपादहानिः ॥ (विप्रे तु सकलन्दे-

---

१ यो विप्रः हले शकटे च पुमांसं गां स्वयमात्मनैव वाहयेत् योजयेत् । स प्राजापत्यद्वयं कुर्यात् । योषितं गां च यो वाहयेत् स द्विगुणमर्थात् प्राजापत्यचतुष्टयं कुर्यादित्यर्थः । योषिद्गोवाहकाश्चत्वारोऽपि वर्णा प्राजापत्यचतुष्टयभागिनो भवन्तीति बोद्धव्यम् ।

२ वृषमिति । यो ब्राह्मणः कामतः स्वेच्छया समुत्सृष्टं श्राद्धादौ त्यक्तं वृषभं पुमांसं गाम् वाऽथवा समुत्सृष्टां श्राद्धादौ त्यक्तां कपिलां कपिलवर्णां स्त्रियं गां ज्ञानत इत्वाक्षेपः । हलैः हलादौ योजयति वाहयति स चान्द्रायणद्वयं कुर्यात् ।

यमि) त्यादिवचनात् ॥ (अत्र कपिलोत्सृष्टवृषवाहने तुल्यप्रायश्चित्तदर्शनात् । कपिलावधे यत्प्रायश्चित्तं उत्सृष्टवृषवधेपि तदेव (वृषस्योत्सृष्टत्वेन स्वत्वाभावेपि भूतपूर्वस्वत्वमाश्रित्य स्वत्वं कल्पनीयमिति विशेष इति गोपालः) ॥ यवनादौ गोविक्रये विनिमये च विक्रयविनिमयकर्तुश्चान्द्रायणं प्रायश्चित्तम् । यवनादौ गोविक्रयविनिमयानन्तरं यवनकर्तृकतद्गोवधे विक्रयविनिमयकर्तुस्साक्षाद्वधप्रायश्चित्तम् ।

१ विक्रयैर्गां विनिमयैर्दत्वा गोमांसखादके ॥
चान्द्रायणव्रतं कुर्य्याद्वधे साक्षाद्वधीभवेत् ॥

इतिगौतमवचनात । स्वीयन्दत्वा परकीयग्रहणं

---

१ विक्रयैरिति । विक्रयैर्मूल्यादानैः विनिमयैः स्वकीयवस्तुदानपूर्वकान्यदीयवस्तुग्रहणै र्हेतुभिः मांसखादके , यवनादौ दत्वा चान्द्रायणव्रतं कुर्यात् । ब्राह्मणादिरिति शेषः । वधे यवनकर्तृकब्राह्मणादिविक्रीततत्प्रत्यर्पितगोहनने तु साक्षात्स्वयं वधी भवेत् गोवधभागी स्यात् । विक्रयविनिमयकारीति शेषः ।

विनिमयः ॥ चान्द्रायणमत्र [1]शिशुचान्द्रायणम् तत्र पादोनधेनुचतुष्टयम् ॥ साक्षाद्वधप्रायश्चित्तं तु स्वामिकर्तृभेदेन पूर्वमभिहितमेव ॥

अथ रोधादिनिमित्तकप्रायश्चित्तम् ॥

तच्च सर्ववर्णस्वामिकगोवन्धनकर्तॄणां सर्ववर्णानां समानमेतदिहोच्यते ॥ रोधने गोमरणे रोधनकर्तुः प्राजापत्यपादम् । अयथावन्धने अकालवन्धनेच गोमरणे वन्धनकर्तुः प्राजापत्यपादद्वयम् । हलादियोजने अतिवाहादिना गोमरणे हलादियोजकस्य प्राजापत्यपादत्रयम् । दण्डविशेषनिपातने गोमरणे दण्डनिपातनकर्तुः धर्म्मार्थातिरिक्तकूपखातादिनिपातादिना गोमरणे तत्कूपखातादिकर्तुश्च प्राजापत्यमेकं प्रायश्चित्तम् ।

---

१ शिशुचान्द्रायणमिति । एतल्लक्षणं यथा-
चतुरः प्रातरश्नीयात्पिण्डान्विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं चरेत् ॥
अस्य फलम्-
यथाकथंचित्पिण्डानां तिस्रोऽसीति समाहितः ।
मासेनाश्नन् हविष्यस्य चन्द्रस्यैति सलोकताम् ।

१ रोधने तु चरेत्पादं वन्धने चार्द्धमेव तु ।
योजने पादहीनं स्यात् प्राजापत्यं निपातने
इति पराशरवचनात् ॥ रोधनम् आहारार्थगमनप्रतिरोधनं वन्धनमयथाबन्धनम् । अकालबन्धनं च अयथावन्धनम्, तच्च नारिकेलमुञ्जादिवन्धनम् । तदाह व्यासः—

२ न नारिकेलैर्न्न च शाणवालै
र्न्न चापिमौंजैर्न्नच शृङ्खलैश्च ।

---

१ रोधन इति । रोधने आहारार्थगमनावरोधे दण्डादिनेति शेषः । सति गोमरणे रोधनकर्ता पादं प्राजापत्यव्रतस्यैकं पादमित्यर्थः । चरेत् कुर्यात् । वन्धने(दृढ़रज्वादिना) संयमने सति गोमरणे वन्धनकर्ता अर्द्धमेव प्राजापत्यस्य पादद्वयमित्यर्थः । योजने हलादौ वाहने सति गोमरणे पादहीनं प्राजापत्यस्य पादत्रयमित्यर्थः । व्रतं कुर्यात् । निपातने दण्डादिप्रहारेण गोवधे तु प्राजापत्यं पादचतुष्टयविशिष्टं सर्वं प्राजापत्यव्रतमित्यर्थः ।

२ न नारिकेलैरिति । नारिकेलै र्नारिकेलत्वङ्निर्मितरज्जुभिर्गावो न वन्धनीया न संयमनीया । तालशाणैस्तालफलसम्बन्धित्वङ्निर्मितरज्जुभिरपि न बंधनीया। मौंजै र्मुञ्जरज्जुभिश्च न बन्धनीया । शृङ्खलै र्लौहमयरज्जुभिश्च न बन्धनीया । तेषामति दृढत्वात्तैर्वन्धने गोरवश्यं क्लेशसम्भवात् । यदि चेदन्यरज्जवभा

एतैश्च गावो न च वन्धनीया
वद्ध्वा तु तिष्ठेत् परशुं गृहीत्वा

इति ॥ अकालवंधनं च दिवसे वन्धनम् योजने हलादियोजने अतिवाहे इति शेषे पूरणीयम्

१ अतिवाहेन पादोनं कृच्छ्रमज्ञानताडने ।
इति बृहस्पतिवचनैकवाक्यत्वानुरोधात् ॥ निपातने दण्डनिपातने, कूपावटादिनिपातने च, दंडोऽत्र विशेषणविशिष्टः । तथा चाङ्गिराः—

२ अङ्गुष्ठमात्रस्थौल्येन वाहुमात्रप्रमाणतः ।
सार्द्रश्च सपलाशश्च दण्ड इत्यभिधीयते ।

वाच्चैर्वन्धनं कुर्यात्तदा वन्धनकर्ता परशुं तन्नामास्त्रं गृहीत्वा तिष्ठेत् गोरक्षणार्थमिति शेषः ।

१ अतिवाहेनेति । हलादौ गोर्वाहकः पादोनं कृच्छ्रम् अतिताडनकर्ता च सर्वं कृच्छ्रं कुर्यादित्यर्थः ।

२ अंगुष्ठमात्रेति । अंगुष्ठमात्रस्थौल्येन अंगुष्ठस्थौल्यसमानस्थौल्येनावाहुमात्रप्रमाणतः वाहुमात्रपरिमाणेन सार्द्रः सहितः सपलाशः सपत्रो दण्डः । अंगुष्ठवत्स्थूलो वाहुमात्रः सपत्रो दण्डोऽभिधीयत इत्यर्थः ।

पलाशं पत्रम् । (पत्रं पलाशं छदनमि) त्यमरकोषात् ॥

रात्रौ संयमानार्थं रोधे यथावंधने च गोमरणे तत् स्थितस्य रोधनकर्तुर्बंधनकर्तुश्च न दोषः ।

१ सायंसंयमनार्थं तु न दुष्येद्द्रोधबन्धयोः ।

पंकलग्नाग्निदाहेषु प्रायश्चित्तं न विद्यते । इतिसम्बर्तवचनात् । सायमिति रात्रावित्यर्थः । वन्धनं यथाबन्धनम् । यथाबंधनमाह व्यासः—

२ कुशैःकाशैश्च बध्नीयात् स्थाने दोषविवर्जिते इति । अत्र कुशकाशपदं नारिकेलमुंजाद्यतिरिक्तसर्वबन्धनोपलक्षकम् अन्यथा नारिकेलमुञ्जाद्यतिरिक्तत्वे विशिष्टे कुशकाशातिरिक्ते तृणादौ

---

१ सायमिति । रात्रौ बन्धनार्थं रुद्धा बद्धा च गौर्मृताश्चेत्तदा रोधनबन्धनकर्ता न प्रायश्चित्ती । रक्षणार्थमेव तयोर्विधानात् पंकलग्ना स्वयं पंके पतिता सती अग्नौ दग्धा च सती मृता चेत्तदा गोस्वामी प्रायश्चितभागी नेत्यर्थः ।

२ कुशैरिति । दोषैः सर्पव्याघ्रादिभयरूपै र्विवर्जिते रहिते स्थाने कुशै र्वर्हिषैस्तत्सम्बन्धिरज्जुभिर्वा काशैस्तत्सम्बन्धिरज्जुभिर्वा बध्नीयात् । गामिति शेषो बोध्यः । कुशकाशानामल्पसारत्वात्तद्रज्जूनामपि तादृशत्वान्न गवां क्लेशसम्भव इति भावः

व्यवस्था न स्यात् ॥ (तत्रास्थितस्य त्वपालननिमित्तकगोवधजन्यदोष) इतिस्मार्ताः ॥ अपालननिमित्तकप्रायश्चित्तं तु ।

एकपाकेन वसतां मध्ये एकेनैव कर्तव्यं तेनैव सर्वेषां तेषां पापनाशो न तु सर्वेषां पृथक् पृथक् ।

१ भ्रातृणामविभक्तानामेको धर्म्मः प्रवर्तते ।
विभागे सति धर्म्मोपि भवेत्तेषां पृथक्पृथक् ।

इतिवचनात् । पालकासमर्पणे स्वामिनः पालकसमर्पणे पालकस्यैवापाननिमित्तकगोवधप्रायश्चित्तम् । न तु स्वामिनः ।

२ अनागतस्य चानेता आगतस्य च रक्षिता ।
रात्रावपि यदान्योस्ति तदा स्वामी न दोषभाक् ॥

१ भ्रातृणामिति । अविभक्तानाम् सहपाकिनां भ्रातृणां सोदराणां वैमात्रेयादीनाम् एको धर्मः प्रवर्तते एकेन कृतो धर्मश्चेत् सर्वेऽपि कृतधर्माः एकेन पापं कृतं चेत् सर्वेऽपि कृतपापा भवन्तीत्यर्थः । विभागे सति असहभोजने सति तेषां भ्रातृणां धर्मोऽपि पृथक् पृथक् भवतीत्यर्थः ।

२ अनागतस्येति । यदा अनागतस्य स्वामिगृहमप्राप्तस्य गोरिति शेषः । आनेता प्रापकोऽन्यः । आगतस्य स्वामिगृहप्राप्तस्य च गोरिति शेषोऽत्राऽपि रक्षिता रक्षणकर्ताऽन्यः । रात्रौ निशीथेऽपि अन्यः

इति ।

दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे।
योगच्छेमोन्यथा चेत्तु पालो वक्तव्यतामियात्
इति बृहस्पतिवचनाभ्याम् ।

अथ व्यवस्था ॥

द्विजस्वामिकगोरपालनान्मरणे स्वामिनस्सवृषगोदक्षिणाकप्राजापत्यमेकं प्रायश्चित्तम् ।

१ अपालनाद्विनश्येत्तु गौश्चरन्ती कथञ्चन
जलौघपल्वले मग्ना नागविद्युद्धतापि वा ॥
श्वभ्रे वा पतिता कस्माच्छ्वापदैर्भक्षितापि वा
प्राजापत्यं चरेत् कृच्छ्रं गोस्वामी व्रतमुत्तमम्
इत्यादि ।

अनडुत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम्

तद्दृष्टा एवं दशायां गौर्मृता चेत् तदा स्वामी गोस्वामीत्यर्थः । न दोषभाक् गोबधजन्यप्रायश्चितभागी नेत्यर्थः ।

१ अपालनादिति । चरन्ती तृणादिभक्षयन्ती सती गौः अपालनादरक्षणाद्धेतोर्यदि कथञ्चन केनापि कारणेन विनश्येत् । वा जलौघपल्वले जलौघे बृहज्जलाशये पल्वलेऽल्पजलाशये च मग्ना

इत्यन्तपराशरवचनात् । प्राजापत्ये धेनुरेका तन्मूल्यकार्षापणत्रयम्वा ॥ अत्र वृषमूल्यपञ्चकार्षापणम् । गोमूल्यं कार्षापण एकः । इति स्मार्ताः । तेन सदक्षिणप्राजापत्ये नवकार्षापणम् । इति शूलपाणिमतानुसारेण तन्मते इतिकर्तव्यतानादरणात् ॥ स्मार्तमते तु धेनुद्वयं वृषभो गौश्च दक्षिणा तेन मिलित्वा द्वादशकार्षापणम् ॥

शूद्रस्वामिकगोरपालनान्मरणे तत्स्वामिनो यत्किंचित्दक्षिणाकप्राजापत्यव्रतं प्रायश्चितम् ।

१ शीतानिलहता चैव उद्बंधनमृतापि वा
शून्यागाराद्युपेक्षायां प्राजापत्यं विनिर्दिशेत् ।

वाऽथवा नागविद्युद्धता नागो हस्ती सर्पो वा विद्युत् अचिरप्रभा ताभ्यां हता विनाशिता भवेत् । वा श्वभ्रे कूपे पतिता, कस्मात् कारणात् श्वापदै र्व्याघ्रादिभिः भक्षिताऽपि भवेत् । तदा गोस्वामी उत्तमम् कृच्छ्रं प्राजापत्यं कृच्छ्रसंज्ञकं प्राजापत्यं व्रतं चरेत् कुर्यादित्यर्थः । अनड्वत्सहिताम् । अनड्वान् वृषभस्तत्सहितां तद्वितीयामित्यर्थः ।

१ शून्यगृहादावुपेक्षणे कृते यदि तुषारेण वायुना वा हता व्यापादिता । उद्ध्वंबन्धनेन कंठस्थितबन्धनेन मृता चेत् गौरिति शेषः । तदा प्राजापत्यं कुर्यादित्यर्थः ।

इतिपराशरवचनात ॥ शीतानिलहतेत्यादिकं यथाकथञ्चिन्निमित्तमात्रोपलक्षकं तेन गृहदाहादिनापि शून्यागारादौ गोमरणेऽपालननिमित्तकत्वात्प्राप्तिः । अन्यथा तत्र व्यवस्थाकांक्षाऽपूर्णैव तिष्ठेत् ॥ एतच्च चतुर्हायनादिगोरपालने त्रिहायनपर्यंतस्याग्रे वक्ष्यते । उत्सृष्टवत्सतरीवृषयोरपालनान्मरणे तदुत्सृष्टुर्न्न दोषः । [अपालनाद्विनश्येत्वि] त्यादि वचनस्य स्वामिप्रायश्चित्ताऽभिधायकत्वादुत्सृष्टुस्तदीयस्वामित्वाभावात् ॥ पालकप्रायश्चित्तव्यवस्थायान्तु स्वामिपदस्थाने पालकपदन्देयम् । अन्यत् समानम् ॥ एकाधिकगोरपालनान्मरणे स्वामिनः पालकस्य वा द्विगुणं प्रायश्चित्तम् । (व्यापन्नानां बहूनां चे) त्यादिसंवर्तवचनस्यापिशब्दस्वरसात् ॥

बहुकर्तृकैकाधिकगोरपालनान्मरणे बहूनां पालकानां प्रत्येकं द्विगुणं प्रायश्चित्तम् ॥ पालके द्रव्याभावे स्वामिना प्रायश्चित्तार्थं द्रव्यं देयम् ॥ म्लेच्छः पालको न कर्त्तव्यः करणे तु तस्य प्रायश्चित्तमिति विभाव्यम् ॥ (म्लेच्छपालके स्वामिना कर्त्तव्यमि)

ति स्मार्तगोपालौ ॥ अशक्तपालकेऽपालनात् गोमरणे स्वामिनः पादोनप्राजापत्यं प्रायश्चित्तम् ।

१ पल्वलौघवृकव्याघ्रश्वापदौघनिपातने ।
श्वभ्रोद्बन्धनसर्पाद्यैर्मृते पादोनमाचरेत् ॥

इतिविष्णुवचनात् । आदिपदात् गृहदाहभंगादि-परिग्रहः ॥

एकहायनद्विहायनत्रिहायनगोरपालनान्मरणे स्वामिनः सार्द्धकार्षापणदक्षिणाकप्राजापत्यपादं प्रायश्चित्तम् ।

२ पादश्चाप्राप्तके देयो वत्से स्वामिन्यरक्षिते ।

इतियमवचनात् ॥ अप्राप्तके त्रिहायनपर्यन्ते ॥

---

१ पल्वलौघेति । पल्वलमल्पजलाशयस्तस्यौघः समूहः । वृक-व्याघ्रादयो ये श्वापदास्तेषामोघः समूहः । एभिर्निपातने मरणे सति गोरिति शेषः । तथा श्वभ्रः उद्बन्धनं कण्ठस्थितरज्वा ऊर्ध्व-स्थानीयकीलकादौ बन्धनम् । सर्पादयः प्रसिद्धा एव अत्रादिपदं गृहदाहभंगादिबोधकम् । एभि र्मृते हते च सति गवीति शेषः । तदा पादोनं त्रिपादं प्राजापत्यं चरेत् कुर्यादिति विष्णोरभिप्रायः ।

२ पादश्चेति । अत्र स्वामिनीति तृतीयार्थे सप्तमी । अप्राप्तके त्रिहायनपर्यन्ते वत्से स्वामिनाऽरक्षिते सति पादो देयः प्राजापत्यस्यै कश्चरणः प्रायश्चित्तमित्यर्थः । स्वामिन इति शेषः ।

लतादिनिबंधघण्टादिदोषेण गोमरणे घण्टाद्याभरणदानकर्तुः प्राजापत्यपादद्वयं प्रायश्चित्तम् ।

१ घण्टाभरणदोषेण गवां यत्र विपद् भवेत् ।
कृच्छ्रार्द्धमाचरेत्तत्र भूषणार्थं कृतं हि तत् ॥

इतिमनुवचनात् ॥ (इदं गोरण्यप्रवेशेन लतानिबद्धघण्टादिदोषेण मरणे बोध्यमि] तिथितत्त्वपाणिस्मार्तौ ॥ तेन घंटाद्याभरणयुक्ताया गोर्व्याघ्रादिभिर्न्निपातने घंटादौ लतादिनिबंधनादिदोषाभावे घंटाद्याभरणदातुर्न्न दोषः । [घंटाभरणदोषेण] त्यादिवचने घंटाभरणदोषपदश्रवणात् । प्रापकांतराभावाच्च ॥

धर्म्मार्थं कूपखातादौ गोमरणे कूपखातादिकर्तुर्न्न दोषः । मशकादिनिवारणार्थं प्रज्वालिताग्निना गृहदाहादिना वा बंधनरहितायां गोर्म्मरणे तत्र स्थितस्य स्वामिनो न दोषः ।

---

१ घण्टाभरणेति । शोभार्थं घण्टाबन्धनाद्गोर्मरणे तस्य शोभार्थत्वेन प्राणक्लेशार्थत्वाभावाद्बन्धनकर्तुः प्राजापत्याख्यकृच्छ्रस्यार्द्ध° पादद्वयं प्रायश्चित्तमित्यर्थः ।

१ कूपे खाते च धर्म्मार्थे गृहदाहे च या मृताः ॥
ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते ।
इति पराशरवचनात ।

२ गोपालको गवां गोष्ठे यस्तु धूमन्न कारयेत् ।
त्यादिदेवीपुराणाच्च ॥ आम्रवाटिकादिरक्षार्थं
खातस्यापि धर्मार्थत्वमेव तत्रापीयमेव व्यवस्था । [अ-
श्वत्थमेकमि]त्यादि पञ्चाम्ररोपी नरकन्न पश्येदि
त्यंतवचनादतस्तत्रापि कूपवदेव व्यवस्था । स्वामिनस्तु
पालनाभावेऽपालनप्रायश्चित्तं तत्रापि । पूर्वं व्याधि-
युतगोर्दंडाद्यभिघातेन मूर्छया पतनमनंतरं गमनग्रासा-
दिकृत्वा मरणे गमनग्रासादिभिस्तदानीन्तनमृत्युहे-
त्वभावे निश्चिते दण्डाद्यभिघातकर्तुर्न्नदोषः ।

---

१ कूप इति । धर्मार्थं कूपखातादौ स्वयं गोमरणे कूपखातादि-
कर्त्तुः । गृहदाहे बन्धनरहितगोमरणे गोस्वामिनः । घोरे ग्रामदाहे
च बन्धनरहितगोमरणेऽपि गोस्वामिनो न प्रायश्चित्तमित्यर्थः ।
पूर्वत्र धर्मार्थत्वाददोषः । द्वितीयतृतीययोरशक्यरक्षणत्वाददोष
इति भावः ।

२ गोपालक इति । गां पालयतीति गोपालः स एव गोपालकः ।
स गोष्ठे गोरक्षणार्थं धूमं न करोति चेत्तदा मशकादिक्लेशाद्गोम-
रणे प्रायश्चित्ती भवतीत्यर्थः ।

१ मूर्च्छितः पतितो वापि यदि दंडाहतः पशुः ।
उत्थितस्तु यदा गच्छेत् पञ्च सप्त पदानि वा ।
ग्रासं वा यदि गृह्णीयात् तोयं वापि पिबेद्यदि ।
पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते ।
इतिसंवर्तवचनात् ॥ पूर्वव्याधिशून्यस्य तत्प्रहारजनितव्याधिनाऽग्रासादि कृत्वापि मरणे साक्षाद्धप्रायश्चित्तमेवेति विभाव्यम् ॥ गोर्यत्रणे चिकित्सायामन्तर्मृतगर्भनिष्काशने च गोमरणे यंत्रणकर्तुस्तच्चिकित्साकर्तुस्तद्गर्भनिःकाशन कर्तुर्न्न किंचिदपि प्रायश्चित्तम् ॥

२ यंत्रणे गोचिकित्सायां मूढगर्भविमोचने ।
यत्ने कृते विपत्तिः स्यात्प्रायश्चित्तन्न विद्यते ॥

---

१ पूर्वव्याधिपीडिता गौ र्दण्डादिना हता सती मूर्च्छिता अथवा पतिता भवेत् भूमाविति शेषो बोध्यः । तदनन्तरमुत्थाय कतिपयपादान् चलित्वा ग्रासादि गृहीत्वा मृताचेत्तदा दण्डादिनाऽभिघातकर्ता न दोष भागित्यर्थः । अत्र गोमरणे पूर्वव्याधिरेव हेतु र्न दण्डाद्यभिघात इति तात्पर्यम् ।

२ यंत्रण इति । एषां कल्याणार्थत्वान्नैतत्कर्तुर्दोष इति भावः ।

इतिसंवर्तवचनात् । (यंत्रणं व्याध्यादिनिपतनार्थं संदंशांकुशादिप्रवेशनमि)ति मिताक्षरा । मूढ़गर्भोऽन्तर्मृतगर्भः । मुह वैचित्ये धातुरित्यस्मात्तथार्थत्वादिति स्मार्त्ताः ॥ गवादिहितार्थं विजानता लौहादिना दाहे कृते शिराकृते भेदे कृते छेदे वा कृते गोमरणे लौहदाहादिकर्तुः शिराभेदकर्तुश्छेदकर्तुर्वा न किंचिदपि प्रायश्चित्तम् ॥

१ दाहच्छेदशिराभेदप्रयत्नैरुपकुर्वता ।

विजानतो गोहितार्थं प्रायश्चित्तं न विद्यते ।

इतिसंवर्तवचनात् । दाहो लौहादिना दाहः । छेदो व्याधिनाशार्थछेदनं शिराभेदः नाडीछेदः [नाडी तु धमनिश्शिरा] इतिकोषात् ॥ गोव्याधिनाशार्थं विहितपरिमितौषधदाने गोमरणेऽभिज्ञस्यौषधदातुर्न किंचिदपि प्रायश्चित्तम् ।

२ औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु च ।

---

१ दाहेति । दाहादीनां गोहितार्थं विधानान्नोपकर्ता दोषीति बोध्यम् ।

२ औषधमिति । औषधादानां गोब्राह्मणप्राणरक्षणार्थं विधानमतो न दाता दोषभागिति तदशायः ।

प्राणिनां प्राणरक्षार्थं प्रायश्चित्तन्न विद्यते । इतिसंवर्तवचनात् ॥

गव्युपकारार्थं स्वल्पतैललवणखलिदाने गोमरणे तैललवणखलिदातुर्न्नदोषः । अधिकतैलादिदाने प्राजापत्यपादं प्रायश्चित्तम् ।

१ औषधं लवणं चैव स्नेहं पिण्याकमेव च ।
अतिरिक्तन्न दातव्यं काले स्वल्पं तु दापयेत् ॥

अतिरिक्ते विपन्नानां कृच्छ्रपादो विधीयते । इतिव्यासवचनात् । (अत्र भिषगतिरिक्तस्य उपकारार्थं प्रवृत्तस्यातिरिक्तौषधदाने प्रायश्चित्तबोधकमौषधं लवणमित्यादिवचनमि) ति मिताक्षरा ॥

देवालयखाते सीम्नः खाते च गोमरणे तत्खात कर्तुः गोमैथुने गोमरणे मैथुनकारयितुश्च न दोषः ।

२ देवद्रोण्यां व्यवाये च कूपेष्वायतनेषु च ।

---

१ औषधं लवणञ्चेति । एषामपि स्वल्पानां हितार्थत्वाद्दातुरदोषः । औषधाधिक्यदाने त्ववश्यं प्राजापत्यकृच्छ्रैकपादभागीत्यभिप्रायः ।

२ देवेति । देवालयादीनां धर्मार्थत्वात् व्यवायस्य च गोहितार्थत्वान्न देवालयादिकर्ता व्यवायकारयिता च दोषीति बोध्यम् ।

एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते । इति संवर्तवचनात् ॥ देवद्रोणी देवालयो व्यवायो गवांमैथुनं विवाहे इतिपाठान्तरं तस्यापि मैथुनमेवार्थः आयतनं सीमा ॥ खातायतनकूपकर्तुर्दोषाभावाप्रापकमिदं स्वामिनः पालनाभावेऽपालननिमित्तकप्रायश्चित्तमेव तत्रापि ॥

श्राद्धादौ त्रिशूलचक्रादिनांऽकनकरणे शूलचक्रांकनकर्तुर्न्न दोषः ।

१अन्यत्रांकनलक्ष्मभ्यां वाहुनिर्म्मोचने कृते । इतिप्रायश्चित्तप्रकरणीयांगिरोवचनात् । अन्यत्रेति प्रायश्चित्तमिति तत्प्रकरणस्थेनान्वयः । तेनांकनलक्ष्मणोऽन्यत्र प्रायश्चित्तं नत्वंकनलक्ष्मणयोरित्यर्थः पर्यवसितः ॥ निवार्य्यंतं स्वामिनं पालकं वाऽतिक्रम्य गर्तकांतारादौ गोमरणे निवारकस्य स्वामिनः पालकस्य वा न दोषः ।

---

१ शूलाद्यङ्कनस्यापि गोः स्वाच्छन्द्यसम्पादनाद्धितार्थत्वेन तत्कर्तुरदोषः ।

१ अरक्षिते तु कूपादौ मृते व्याघ्रादिभक्षिते।
व्रतार्द्धमाचरेत् स्वामी रक्षिते नास्ति दूषणम् ॥

इत्यंगिरोवचनात् । शंकारहितस्थाने पालकसत्वे कथञ्चित्तगोमरणे पालकस्य न दोषः ।

२ यदा चरेत्तु विपिने निर्भये वृकवर्जिते ।
व्याघ्रादिभिरगत्या तु खादिते नास्ति दूषणम् ॥

इतिस्मृतेः ॥ बंधनशून्यगोर्वज्रादिभिः कथंचिन्मरणे तत्र स्थितस्य गोपालस्य न दोषः ।

३ राजग्रहे गृहीतो वा वज्रादिनिहतोपि वा ।
अथ सर्पेण वा दष्टो वृक्षाद्वा पतितो भवेत् ।
व्याघ्रादिभिर्हतो वापि व्याधिभिर्वाप्युपद्रवैः ।
न तत्र दोषः पालस्य न च दोषोस्ति गोमताम्॥

१ कूपादिपतनाद्व्याघ्रादिभक्षणाच्चाऽनिवारणे स्वामिनः पालकस्य वा दोषः । शक्त्यनुसारेण गोः कृतेऽपि निवारणे अनादृत्य गतायास्तस्या मरणे तु न पालकः प्रायश्चित्ती । अशक्यरक्षणस्य दोषानाधायकत्वादिति भावः ।

२ भयशून्यस्थाने व्याघ्रादिभिरगत्या गोमारणे स्वामिपालकयोर्नकोऽपि दोषी ।

३ राजग्रहेति । एषामशक्यवारणत्वाद्गोश्च बन्धनहीनत्वान्न पालकः स्वामी वा दोषभागिति बोध्यम् ।

इति नारदवचनात् ॥ गृहपतनातिवृष्ट्यादिना बंधनशून्यगोमरणे पालनसत्वे पालकस्य न दोषः।

१ ग्रामघाते शरीघे च वेश्मभंगादिपातने ।
अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते ॥

इतिपराशरवचनात्

अथ व्रात्यम्

तच्चोपनयनकाले उपनयनाकरणेन । उपनयनकालमाह याज्ञवल्क्यः—

२ आषोडशात् द्वाविंशाच्चतुर्विंशाच्च वत्सरात्।
ब्रह्मक्षत्रविशां काल औपनायनिकः परः ॥
अत ऊर्द्धं पतंत्येते सर्वधर्मबहिः कृताः ।

---

१ ग्रामेति । एषां दैविकोपाधित्वाद्गोश्च बन्धनशून्यत्वात्पालकस्वामिनो न कस्यापि दोषभागित्वमित्यवसेयम् ।

२ अषोडशादिति । आङ्शब्दोऽत्र मर्यादार्थकः । स च त्रिष्वन्वेति । आषोडशाद्वत्सरात् षोडशवत्सरं मर्यादीत्य (अर्थात्पञ्चदश वर्षपर्यन्तं) ब्राह्मणस्योपनयनकालः । एवम् आद्वाविंशाद्वत्सरात् द्वाविंशवत्सरम्मर्यादीकृत्य (अर्थादेकविंशतिवर्षपर्यन्तं) क्षत्रियस्योपनयनकालः । एवम् आचतुर्विंशाद्वत्सरात् चतुर्विंशतिवत्सरम्मर्यादीकृत्य (अर्थात् योविंशतिवर्षपर्यन्तं) वैश्यस्योपनयनकाल एतदूर्द्ध्वं त्रयाणामनुपनीतानां व्रात्यता भवतीत्यर्थः ।

सावित्री पतिता व्रात्या व्रात्यस्तोमादृते क्रतोः॥

आङत्र मर्यादायाम् । तेन ब्राह्मणस्य पंचदशवर्षपर्यन्तम् क्षत्रियस्यैकविंशतिवर्षपर्यन्तम् वैश्यस्य त्रयोविंशतिवर्षपर्यंतमुपनयनकालः । तदूर्द्ध्वमनुपनीतस्य व्रात्यता भवति । व्रात्यताप्रायश्चित्तानन्तरन्तस्योपनयनं भवति ।

अथ तत्र व्यवस्था ॥

पितृमातृविहीनानां स्वानां व्रात्यताशालिनां द्विजानां प्राजापत्यत्रयं प्रायश्चित्तम् ।

१ येषां द्विजानां सावित्री नानुतिष्ठेद्यथाविधि।
तान् कारयित्वा त्रीन् कृछ्रान् यथा विध्युपनाययेत्
इतिविष्णुवचनात् । प्राजापत्यत्रये धेनुत्रयं तन्मूल्यन्नवकार्षापणं वेति त्रयः कल्पाः ॥

आलस्यानवधानादिना व्रात्यता शालिनां चान्द्रायणं गोप्रदानं च प्रायश्चित्तम् । [व्रात्यश्चान्द्रायणं कुर्यात् गोप्रदानं चे] ति शंखलिखितव-

१ कालातिक्रमेऽनुपनीतत्वे त्रयाणां कृच्छ्रत्रयोत्तरमुपनयनमिति भावः ।

चनात् ॥ एवं सपादनवधेनवः स्युः । [अस्य चोत्कृष्टगोप्रदानसहितचान्द्रायणतुल्यत्वमि] ति शूलपाणिः

देशोपप्लवादिप्रयुक्तसावित्रीपातेन व्रात्यताशालिनां द्विजानां सपादधेनुत्रयं प्रायश्चित्तम् ।

१पतिता यस्य सावित्री दशवर्षाणि पंच चे ।

त्यादि

सशिषं वपनं कृत्वा व्रतं कुर्यात् समाहितः
हविष्यं भक्षयेदन्नं ब्राह्मणान् सप्त पंच वा ॥
एकविंशतिरात्रं तु पिबेत् प्रसृतियावकम् ।
ततो यावकशुद्धस्य तस्योपनयनं स्मृतम् ॥

इतियमवचनात् । अत्र [सपादधेनुत्रयमि] तिशूलपाणिलिखनाच्च ॥ तेन द्वादशपणाधिकनव-

---

१ पतितेति । विविधबाधादिवशात् यस्य वर्णत्रयस्य पञ्चदशवर्षपर्यन्तमुपनयनं न जातम् तस्य व्रात्यता भवति । तदा व्रात्यताशालिनो ब्राह्मणादयः शिखासहितं शिरोमुण्डनं कृत्वा संयताः सन्तः व्रतं कुर्युः । हविष्यान्नं भक्षयेयुः । पञ्च सप्त वा ब्राह्मणान् भोजयेयुः। स्वयं च प्रसृतियावकं प्रसृति (पसर) परिमितं यवचूर्णमेकविंशति रात्रिपर्यन्तं पिबेत् भक्षयेयुः । ततुत्तरं यवचूर्णभक्षणाच्छुद्धानां तेषामुपनयनमिति यमोक्तेरर्थः ।

कार्षापणदानम् ॥ सहोदरे ज्येष्ठेऽविवाहिते कनिष्ठविवाहे कनिष्ठस्य, ज्येष्ठस्य, कन्यादानकर्तुः, कन्यायाः, पुरोहितस्य च संवत्सरप्राजापत्यं प्रायश्चित्तम् ।

(ज्येष्ठऽनिर्विण्णः कनीयान् निर्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकः ते सर्वे पतिताः संवत्सरप्राजापत्येन कृच्छ्रेण पापमपनुदेयुरि)

तिहारीतवचनात् ॥ संवत्सरप्राजापत्ये त्रिंशद्धेनवः । तन्मूल्यं नवतिकार्षापणं वा संवत्सरानन्तरं तां कन्यां ज्येष्ठाय दद्यात् स तामनुमान्यान्यया विवाहं कुर्यात् । [समाप्तऽब्दे तां कन्यां ज्येष्ठायोपपतिता दयेयुः स तामनुमान्यान्यया निर्विशेतैवं धर्म्मो न लुप्यते] इति हारीतवचनात् । अनुमान्य स्वीकृत्य निर्विशेत् विवाहं कुर्यात् तस्याः स्वीकारमात्रं न तु तस्यां विवाहं ज्येष्ठः कुर्यादित्यर्थः ॥ मिताक्षरायां वशिष्ठः—

परिविंदानः कृच्छ्रातिकृच्छ्रौ चरित्वा पुनर्निर्विशेत् तामेवोपयच्छेत । परिविंदानः परिवेत्तोच्यते असौ

कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै ज्येष्ठाय तामूढां दत्वा ब्रह्मचर्याहृतभैक्ष्यवत् गुरुपरिभवपरिहारार्थं निवेद्य पुनरुद्वहत् कामित्यपेक्षायां तामेवोपयच्छेदिति तामेव ज्येष्ठाय निवेदितां तेनानुज्ञातामुद्वहेदिति ॥ वैमात्रेयदत्तकादेर्भ्रातुः कनिष्ठस्य प्रथमं विवाहे न दोषः । तदाह यमः—

१ पितृव्यपुत्रान् सापत्नान् परनारीसुतांस्तथा ।
दाराग्निहोत्रसंयोगे न दोषः परिविंदतः ॥

परनारीसुता दत्तकादिभ्रातर) इतिशूलपणिः ॥

पुत्रीमीमांसायां गौतमः—

२ भिन्नोदरे च गोत्रे च पितृव्यतनये तथा ।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने ।

दत्तें चेति जनककुले ज्येष्ठभ्रातृसत्त्वेऽपि न

---

१ पितृव्यपुत्रादीन् ज्येष्ठान् विहाय परिविन्दतो विवाहं कुर्वतोऽनुजस्य दाराग्निहोत्रसंयोगे न दोष इति इति वचनार्थः ।

२ भिन्नोदर इति । भिन्नमुदरं यस्य स तस्मिन् वैमात्रेयभ्रातरीत्यर्थः । गोत्रे समानगोत्रे । पितुर्भ्रातृपुत्रे च ज्येष्ठे सत्यपि अनुजस्य परिवेदने विवाहे दाराग्निहोत्रसंयोगे सति न दोष इत्यर्थः ।

दत्तस्य विवाहादौ परिवेतृत्वं नापि कनिष्ठविवाहादौ ।।

ज्येष्ठस्य परिविक्तित्वमित्येतदर्थं छंदोगपरिशिष्टे कात्यायनः

१ देशांतरस्थक्लीवैकवृषणानसहोदरान्
वेश्याभिषक्तपतितशूद्रतुल्यातिरोगिणः ॥
जडमूकान्धबधिरकुब्जवामनकुष्ठकान् ।–
अतिवृद्धानभार्यांश्च कृषिसक्तान् नृपस्य च ॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा ।
कुलटोन्मत्तचौरांश्च परिविंदन्न दुष्यति ॥

देशांतरगतज्येष्ठप्रतीक्षाकालमाह वसिष्ठः–अष्टादश द्वादशवर्षाणि ज्येष्ठं भ्रातरमनिविष्टमानमप्रतीक्ष्यमाणः प्रायश्चित्ती भवति । अनिविष्टमानं अविवाहितं द्वादशेति ब्राह्मणस्य, दशेति क्षत्रियस्य, अष्टाविति

१ देशान्तरस्थेति। देशान्तरस्थो दूरदेशवर्ती । क्लीवो नपुंसकः । एकवृषणः एकाण्डकोशः । इमान् । तथा असहोदरान् भिन्नोदरान् वैमात्रेयादीन् । तथा वेश्याभिसक्तादिचौरांश्चेत्यन्तान् ज्येष्ठान् परित्यज्य परिविन्दन् विहाहं कुर्वन्ननुजो न दुष्यति दोषभागी भवतीत्यर्थः ।

वैश्यस्य, तथाच द्वादशवर्षादिपर्यंतं अविवाहितभ्रातरं प्रतीक्ष्य तावत्पर्यंतवार्तायां अश्रवणे तदीयश्राद्धादि कृत्वा कनिष्ठो विवाहं कुर्य्यात् तदभ्यंतरे पौनःपुन्येन वार्ताश्रवणे श्रवणदिनात पुनर्द्वादशादिवर्षपर्यंतप्रतीक्षा कार्येत्यवगम्यते ॥ निरग्नेर्यस्य मरणभ्रान्त्या दाहादिप्रेतकार्यं कृतं स प्राजापत्यव्रतानुकल्पधेनुमूल्यकार्षापणत्रयलभ्यहिरण्यदानं प्रायश्चित्तं रुद्रस्नपनरूपां शांतिं च कर्तुमर्हति ।

१ प्रेतकार्यं कृतं यस्य स चेदायाति मानवः ।
प्राजापत्यव्रतं कुर्यात् शांन्तिं रुद्रसमुद्भवाम् ।

इतिवृद्धच्छाद्धदर्पणधृतवचनात् । एतद्विषयविस्तारोऽस्मत्कृतकृत्यसारसमुच्चयेऽन्वेष्टव्यः ॥ अविवाहिते ज्येष्ठे सन्यासयुक्ते कनिष्ठविवाहे न दोषः । दोषप्रापकस्मृतेरभावात् ।

---

१ प्रेतकार्यमिति । देशान्तरस्थस्य ज्येष्ठस्य कनिष्ठस्य मरण भ्रान्त्या दाहादिकरणे तदुत्तरं तदागमने दाहादिप्रेतकार्यकर्त्तुः प्राजापत्यव्रतरुद्रस्नपनयोर्विधानाच्छुद्धिरिति तदर्थः ।

१ क्लीवे देशांतरस्थे च पतिते प्रव्रजिते तथा।
योगशास्त्राभियुक्ते च न दोषः परिवेदने ।

इति वृहच्छातातपवचनाच्च । प्रव्रजिते सन्यासिनि देशान्तरस्थे द्वादशवर्षादिप्रतीक्षाकालपर्यंतं यस्य वार्ता न श्रुता तादृशे ॥ ज्येष्ठभगिन्या अविवाहे सोदरकनिष्ठभगिनीविवाहे देवलः—

२ज्येष्ठायां विद्यमानायां कन्यायामुह्यतेऽनुजा ।
स चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषुः स्मृता ॥

सा अनुजा कनिष्ठेति यावत् । पूर्वा ज्येष्ठा वसिष्ठः—

(अग्रे दिधिषुपतिः कृच्छ्रं द्वादशरात्रं चरित्वा-निर्विशेत् ताञ्चैवोपयच्छेत् दिधिषुपतिः कृच्छ्राति

---

१ क्लीव इति । नपुंसके अतिदूरदेशस्थे १२ वर्षप्रतीक्षाकाल पर्यन्तयदीयवार्ताश्रवणं न तादृशे) । पातित्ययुक्ते [जातिभ्रष्टे] गृहीतसन्यासे योगाभ्यासरते स्वापेक्षया ज्येष्ठे भ्रातरि सत्यपि कनिष्ठस्य परिवेदने विवाहे न दोष इत्यर्थः ।

२ ज्येष्ठाकन्यासद्भावे कनिष्ठा विवाहिता चेत् साऽग्रेदिधिषुर्भवति अस्याः पतिः कृच्छ्रव्रतभागी । ज्येष्ठा च दिधिषुर्भवति तत्पतिः कृच्छ्रातिकृच्छ्रोभयभागीत्यर्थः ।

कृच्छ्रौ चरित्वा पुनर्निर्विशेत्।) (एतदज्ञानकृते) तिशूलपाणिः।

अथ गोगमने व्यवस्था॥

ज्ञानतः सकृत्गोगमने ब्राह्मणस्य वृषभैकादशदक्षिणाकत्रैमासिकव्रतं प्रायश्चित्तम्। (१परदारगमने गोव्रतं गोगमने चे)ति वृहद्विष्णुवचनात्। गोव्रतं ब्राह्मणस्वामिकगोव्रतं त्रैमासिकम्। तेन ज्ञाने ब्राह्मणस्य एकपंचाशत् कार्षापणदानम् अज्ञाने तु सार्द्धमासिकव्रतम्। सार्द्धाष्टधेनुमूल्यसार्द्धपंचविंशतिकार्षापणदानं वा सदक्षिणम्॥ क्षत्रियस्य ज्ञान पूर्वकगोगमने पादोनत्रैमासिकव्रतम्। पणचतुष्टयाधिकाष्टत्रिंशत्कार्षापणदानं वा। अज्ञाने तु पणद्वयाधिकोनविंशतिकार्षापणं दक्षिणा तु षट्त्रिंशतपणरूपा वैश्यस्य ज्ञानपूर्वकगोगमने गोदक्षिणाकसार्द्ध पंचविंशतिकार्षापणदानम् अज्ञाने गोमूल्यार्द्धदक्षिणाकपादोनत्रयोदशकार्षापणम्। शूद्रस्य बुद्धिपूर्वकगोगमने सार्द्धकार्षापणदक्षिणाकद्वादशपणा-

१ गवां च परदाराणां गमने गोव्रतं चरेत्।
इति वृहद्विष्णुवचनानुवादः।

धिकद्वादशकार्षापणम् । अज्ञाने तु द्वादशपणदक्षिणाकषट्पणाधिकषट्कार्षापणं देयम् [गोव्रतं गोगमने चे] ति (विप्रे तु सकलन्देयमि) त्यादिवृहद्विष्णु वचनाभ्याम् । गोगमने रेतःसेकात् पूर्वं ब्राह्मणस्य चान्द्रायणं प्रायश्चित्तम् ।

गोयोनिगमनं कृत्वा कृच्छ्रं चान्द्रायणं स्मृतम् । इतिसंवर्तवचनात् । चान्द्रायणे सार्द्धसप्तधेनवः । अज्ञाने तदर्द्धम् । क्षत्रियादीनां पादपादहानिः [विप्रे त्वि]त्यादिवचनात् अत्यंताभ्यासेन ज्ञानपूर्वकगोगमने ब्राह्मणस्य षाड्वार्षिकव्रतं प्रायश्चित्तम् । १ (सखीसयोनिसगोत्राशिष्यभार्याश्नुषासु गवि चैवमि) तिव्यासवचनात् । षाड्वार्षिके नवतिधेनवः । क्षत्रियादीनां पादपादहानिः । ज्ञानतो जातिभ्रंशकरकर्मकर्तुर्ब्राह्मणस्य सांतपनम् । अज्ञानतः प्राजापत्यं प्रायश्चित्तम् ।

---

१ सखीषु, सयोनिषु भगिनीष्वित्यर्थः । सगोत्रासु शिष्यस्त्रीषु श्नुषासु पुत्रबधूषु गोषु च गमने ब्राह्मणो षड्वार्षिकव्रतभागीत्यर्थः ।

१ जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया ।
चरेत् सांतपनं कृच्छ्रं प्राजापत्यं त्वनिच्छया ॥

इतिमनुवचनात् ॥ जातिभ्रंशकरणयाह मनुः—

२ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः ।
जैह्मं पुंसि च मैथुन्यं जातिभ्रंशकराणि षट् ॥

रुजः कृत्वा पीडाकरणम् अघ्रेयं लशुनादि जैह्मं मैत्रे कुटिलता पुंसि मैथुन्यं पुरुषे स्त्रीकर्मकरणम् ॥ सांतपने धेनुद्वयं प्राजापत्ये धेनुरेका ॥

रुजःकृत्यायां विशेषमाह मनुः—

३ अवगुर्य चरेत कृच्छ्रमतिकृच्छ्रं निपातने ।
कृच्छ्रातिकृच्छ्रं कुर्वीत विप्रस्योत्पाद्य शोणितम् ।

याज्ञवल्क्यः ॥

---

१ कामतो जातिभ्रंशकर्मकरणे सान्तपनकृच्छ्रं प्रायश्चित्तम् । अकामतस्तु प्राजापत्यं प्रायश्चित्तमित्यर्थः ।

२ब्राह्मणपीडन लशुनादिमद्ययोर्गन्धादानं विश्वस्ते कौटिल्यभाव पुरुषे स्त्रीव्यवहारः एषां षण्णां जातिभ्रंशकरत्वं बोध्यम् ।

३ ब्राह्मणस्य अवगुर्य हननेच्छया दण्डाद्युद्यमने कृच्छ्रं निपातने दण्डादिप्रहारे दत्तेऽतिकृच्छ्रं शोणितोत्पादने कृच्छ्रातिकृच्छ्रं च प्रायश्चित्तमवगुरणादिकर्तुरित्यर्थः ।

१ विप्रदंडोद्यमे कृच्छ्रात्यतिकृच्छ्रो निपातने ।
कृच्छ्रातिकृच्छ्रं सृक्पाते कृच्छ्रोऽभ्यंतरशोणिते ॥
दंड इत्युपलक्षणम् ॥ अतिकृच्छ्रे धेनुद्वयं कृच्छ्राति-
च्छ्रे धेनुपंचकम् ।

संकरीकरणं खराश्वोष्ट्रादिवधः ॥ संकरीकरण-
माह मनुः—

२ खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा ।
संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च ॥

अपात्रीकरणमाह मनुः—

३ निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् ॥
अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् ॥

कृमिकीटादिवधः फलादिस्तेयं च मलावहम् ।
तदाह मनुः—

कृमिकीटवयाहत्या मद्यानुगतभोजनम् ।

---

१ ब्राह्मणस्य दण्डकरणोद्योगे कृच्छ्रो दण्डकरणेऽतिकृच्छ्रो रुधि-
रोत्पादने कृच्छ्रातिकृच्छ्रम् अप्रकटरुधिरोत्पादने कृच्छ्रश्च प्राय-
श्चित्तम् ।

२ एषां प्रत्येकं वधः संकरीकरणं बोध्यम् ।

३ श्लोकोक्तानां चतुर्णां प्रत्येकमपात्रीकरणत्वं बोध्यम् ।

फलैधाः कुसुस्तेयमधैर्यं च मलावहम् ॥

तेषां प्रायश्चित्तमाह मनुः—

१ संकरापात्रकृत्यासु मासं शोधनमैंदवम् ।
मलिनीकरणीयेषु तप्तः स्याद्यावकस्त्र्यहम् ॥

अथ प्रकीर्णम् ॥

यस्य पापविशेषस्य प्रायश्चित्तं विशेषतो नोक्तं तत्प्रकीर्णम् (यदनुक्तं तत्प्रकीर्णमि)ति विष्णुवचनात् ॥

अत्र व्यवस्था ॥

प्रकीर्णपापकर्तुः प्राजापत्यमेकं प्रायश्चित्तम् ।

२ यत्रोक्तं यत्र वा नोक्तमिह पातकनाशनम् ।
प्राजापत्येन कृच्छ्रेण शुद्ध्यते नात्र संशयः ॥

इति उशनोवचनात । प्राजापत्ये धेनुरेका तन्मूल्यं कार्षापणत्रयं वा ॥ अत्रैव द्वितीयापि व्यवस्था ॥ यथा

---

१ संकरीकरणादित्रिविधपापापनोदनार्थं मासं यावत् चान्द्रायणं कुर्यात् । त्रिरात्रं क्वथितां (पक्वां) यवागूं च भक्षयेत् ।

२ शास्त्रेऽस्मिन् यस्य पापस्य प्रायश्चित्तं नोक्तं तस्य विनाशाय कृच्छ्रं प्राजापत्यं कुर्यादित्यर्थः ।

प्रकीर्णपापकर्तुः पापानुसारेण शक्त्यनुसारेण च प्रायश्चित्तम् ।

अनुक्तनिष्कृतीनां तु पापानामपनुत्तये ।
शक्तिं चापेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत

इतिमनुवचनात् ॥ शक्तिं चापेक्ष्येतिविभवानुसारेण लघुगुरुपापानुसारेण लघुप्राजापत्यादिगुरुचांद्रायणादिप्रायश्चित्तं वक्तव्यमित्यर्थः ॥

प्रकीर्णे तृतीयापि व्यवस्था ॥

यथा प्रकीर्णपापकर्तुः प्राजापत्यं चांद्रायणं वा प्रायश्चित्तम् । (क्रयविक्रयदुष्टभोजनप्रतिग्रहेष्वनादिष्टप्रायश्चित्तेषु च सर्वेषु चांद्रायणं प्राजापत्यं वे)ति ।

प्राजापत्येन चैकेन सर्वपापक्षयो भवेद्
इति शंखलिखितवचनाभ्याम् ॥ चान्द्रायणे सार्द्धसप्त धेनवः । प्राजापत्ये धेनुरेका ।
महापातकान्याह मनुः--

१ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ।
महांति पातकन्याहुः संसर्गश्चापि तैस्सह ॥

गृहस्थरत्नाकरधृतब्रह्मपुराणे ।

२ दीर्घकालं ब्रह्मचर्यं धारणं च कमंडलोः ।
गोत्रान्मातृसपिंडाद्वा विवाहो गोवधस्तथा ।
नराश्वमेधौ मद्यं च कलौ वर्ज्या द्विजातिभिः ॥

---

१ ब्रह्महत्या ब्राह्मणप्राणवियोगफलको व्यापारः सच साक्षादन्यद्वारा वा । तथा गोभूहिरण्यग्रहणाद्युद्देशेनापि ब्राह्मणवधे ब्रह्महत्या । शास्त्रतो यस्य ब्राह्मणहन्तृत्वं स एव ब्रह्मघातकः । तदुक्तं शातातपेन

गोभूहिरण्यग्रहणे स्त्रीसम्बन्धकृतेऽपि वा ।
यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ॥

अन्यच्च—

रागाद्द्वेषात्प्रमादाद्वा स्वतः परत एव वा ।
ब्राह्मणं घातयेद्यस्तु तमाहु र्ब्रह्मघातकम् ॥

इति प्रयोजकस्यापि शास्त्रीयं हन्तृत्वम् । निषिद्धसुरापानं स्तेयं ब्राह्मणसुवर्णहरणम् गुर्वङ्गनागमः गुरुभार्यागमनम् । एतानि महापातकानीत्यर्थः । एतैश्च सह संसर्गः एतत्पापचतुष्टयकर्तृभिः सह सम्वत्सरं सहवासादिरपि महापातकसंज्ञक एवेति बोध्यम् ।

२ दीर्घकालं ब्रह्मचर्यादीनां कलौ त्यागो बोध्यः । एषां प्रथमस्याऽशक्यरक्षणत्वात् । द्वितीयस्य पूजापात्रत्वेन वाह्यभूम्याद्यशौच क्रियातोऽशुद्धिकरणात् । तृतीयस्य धर्मलोपभयात् सम्बन्धसंकीर्णत्वाच्च । कलौ त्यागः । गोवधादीनामपि त्यागो बोध्यः ।

उशनाः

(मद्यमपेयमदेयमग्राह्यमि) ति ।

यत्तु कुत्रापि दुर्गापूजादौ मद्यपानादिकमुक्तं तत्कलीतरपरमिति प्रायश्चित्ततत्त्वे स्मार्त्ताः ॥ अत्र ब्राह्मणस्य सर्वमद्यपाने महापातकित्वम् । क्षत्रिय-वैश्ययोस्तु विकारसुरापान एव महापातकित्वम् । तालखार्जूरादिमद्यपाने महापातकित्वाभावात् । शूद्रस्य कस्मिन्नपि मद्ये न महापातकित्वं तेन प्रागुक्तमनुवचने सुरापानस्थाने ब्राह्मणीगमने शूद्रस्य पंचममहापातकम् । (स्तेयं ब्राह्मणस्वामिकाशीतिरक्तिकापरिमितहेम्नः ब्रह्महत्या सुरापानं ब्राह्मण-स्वर्णापहरणमि) ति हारीतवचनैकवाक्यत्वात् ॥

स्वर्णस्तु षोडशमाषात्मकः ।

पंचकृष्णलको माषास्ते सुवर्णस्तु षोडश ।
इतिमनोः । कृष्णलः कलायः स एव रक्तिका-भिधः । यवत्रयं कृष्णल इति रत्नाकरः ।

संसर्गप्रकारोऽग्रे वक्ष्यते ॥ अतिपातकन्याह विष्णुः (मातृगमनं दुहितृगमनं स्नुषागमनं च) इति अतिपातकानि ॥ दुहिता पुत्री स्नुषा पुत्रवधूः ॥

अनुपातकमाह विष्णुः-

(पितृपितृव्यमातामहमातुलनृपपत्न्यभिगमनं पितृष्वसृमातृष्वसृगमनं श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनं स्वसृसख्याः सगोत्राया उत्तमवर्णाया अंत्यजायाः कुमार्या रजस्वलायाः शरणागतायाः प्रव्रजितायाः निःक्षिप्तायाः सन्यासिन्या ज्ञानशून्याया अभिगमनंचे)त्यनुपातकानि ॥

एतेषां महापातकातिपातकानुपातकानां ज्ञानतो मरणांतिकमेव प्रायश्चित्तम् । अज्ञानतः प्रायश्चित्तांताभिधानेपि तेन नरकाद्यनुत्पादेपि व्यवहारविरोधो लोकविद्विष्टत्वं च तिष्ठत्येवेति बोध्यम् ॥ ब्राह्मणस्वामिकपंचदशमाषहिरण्यस्तेये ब्राह्मणस्य सांवत्सरिकव्रतं प्रायश्चित्तम् ।

१ सुवर्णादल्पहरणे वत्सरः परिकीर्तितः ।
ऊर्द्ध्वं प्राणांतिकं ज्ञेयं यच्च ब्रह्महनो व्रतम् ।
इतिषट्त्रिंशन्मतात् । वत्सरः सांवत्सरिकप्राजापत्यव्रतं तेन त्रिंशत्प्राजापत्यं त्रिंश द्धेनवः तन्मूल्यनवतिकार्षापणा वा देयाः । ज्ञानतस्तद्द्विगुणं क्षत्रियादीनां पादपादहानिः [विप्रे त्वित्यादिवचनात् ॥ अत्र पंचदशमाषहिरण्यहरणे वार्षिकप्रायश्चित्तोपदेशात्भागहारप्रतिमाषकं चतुर्विंशतिदिनव्रतेन प्राजापत्यद्वयं वर्तते इति भवदेवः ॥

रक्तिकापरिमितब्राह्मणस्वामिकहिरण्यहरणे द्विजस्य सांतपनं प्रायश्चित्तम् ॥

२ स्वर्णकृष्णलिकामेकामपहृत्य द्विजातयः
कुर्युः सांतपनं कृच्छ्रन्तत्पापस्यापनुत्तये ॥

---

१ सुवर्णस्येति । अल्पसुवर्णहरणे वार्षिकव्रतम् । अधिकसुवर्णहरणे तु प्राणान्तिकमेव प्रायश्चित्तम् । यच्च यद्वेत्यर्थः । (प्रायश्चित्तविवेके तु यद्वेत्येव पाठः) ब्रह्मघातिनो यत्प्रायश्चित्तं तदेवास्यापि बोध्यम् ।

२ स्वर्णकृष्णलिका स्वर्णरक्तिका । अन्यत्सुगमम् ।

इतिषट्त्रिंशन्मतात् । सांतपनमत्र यतिसांतपनं चतुरहः साध्यं तेन विंशतिपणा देयाः । ज्ञानतो द्वैगुण्यम् । एवं रक्तिकाद्वयरक्तिकात्रयादिहरणे प्रतिरक्तिकां सांतपनानुसारेण सांतपनद्वयसांतपनत्रयादिकमूहेन करणीयम् ॥ क्षत्रियादित्रयस्वामिकसुवर्णहरणे तूपपातकं तत्र विशेषतः प्रायश्चित्तानुपदेशात् । उपपातकसामान्यप्रायश्चित्तमेव तत्र विशेषतः प्रायश्चित्तानुपदेशात् । उपपातकसामान्यप्रायश्चित्तमेव तत्र व्यवस्था ॥

ज्ञानतः क्षत्रियादिस्वर्णहरणकर्तुर्द्विजस्य त्रैमासिकव्रतं प्रायश्चित्तम् त्रैमासिकव्रतमभिधाय

१ एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः ।
अवकीर्णिवर्जं शुद्ध्यर्थं चांद्रायणमथापि वा

इतिमनुवचनात् । सुवर्णमत्र षोडशमाषात्मकं

१ एतदेवेति । अवकीर्णं पापं तच्च स्त्रीयोनौ ब्रह्मचारिणो वीर्यत्यागरूपं तदस्यास्तीति अवकीर्णी तादृशो ब्रह्मचारी तं वर्जयित्वा तस्यत्वन्यविधं प्रायश्चित्तम् । अन्येषामुपपातकिनां गोवधव्रतं वा चान्द्रायणं व्रतं बोध्यम् ।

तन्न्यूने चांद्रायणं बोध्यम् । ततोपि न्यूनहिरण्यहरणे मासपयः पानम् । ततोपि न्यूनहरणे पराकः प्रायश्चित्तम् ।

उपपातकशुद्धिः स्यादेवं चांद्रायणेन वा ।
पयसा वापि मासेन पराकेणाथवा पुनः ॥

इतियाज्ञवल्क्यवचनात् ॥ चांद्रायणे सार्द्धसप्तधेनवः ॥ मासपयः पाने पराके पंच धेनवः ।

पंचविधो बधी कर्त्ता प्रयोजकोनुग्राहको नुमंतानिमित्ती चेति ॥ तत्र चेतनांतरव्यापाराव्यवधानेन वधनिष्पादकः कर्त्ता । वधार्थमप्रवृत्तं प्रवर्तयतीति प्रवर्तकः । प्रोत्साहकोपि स एव । वध्यस्य पलायनादिरोधकोऽनुग्राहकांतरव्युदासको वाऽनुग्राहकः । हननेऽनुमतिदाता वधप्रतिरोधसमर्थोपि मौनावलंबी चानुमंता । हंतुर्हननप्रयोजकक्रोधोत्पादको निमित्ती । तत्र कर्तुः संपूर्णप्रायश्चित्तम् । प्रयोजकादिचतुर्णां च पादपादहीनं तदेव प्रायश्चित्तम् । (प्रयोजकादीनां व्यवहितमरणफलकानां पादपादहानिरि) तिशूलपाणिः ॥ अप्रवृत्तप्रवर्त्तकस्य ष्टमभागाप-

चये प्रयोजकस्य सार्द्धदशवार्षिकम् । अनुग्राहकस्य ततोपि न्यूनत्वान्नववार्षिकम् । प्रवृत्तोत्साहजनकस्य प्रयोजकस्य ततोपि न्यूनत्वात्सार्द्धसप्तवार्षिकम् । अनुग्राहकान्तरव्युदासकस्यानुग्राहकस्य ततोपि न्यूनत्वात् षाड्वार्षिकं अनुमंतुश्चानुमतिदानेन ततोपि न्यूनत्वात् त्रैवार्षिकमिति ।

अज्ञानपूर्वकब्रह्मवधकर्तुर्द्वादशवार्षिकमभिधाय भवदेवः ॥

अथ संसर्गिणः प्रायश्चित्ते निरूपयितव्ये संसर्गप्रकार आदौ निरूप्यते । तत्र बृहस्पतिः—

एकशय्यासनं पंक्तिर्भांडपक्वान्नमिश्रणम् ।
याजनाध्यापनं योनिस्तथा च सहभोजनम् ॥
नवधा संकरः प्रोक्तो न कर्त्तव्योऽधमैस्सह ॥

एकशय्यासनं पापिना एकशय्याशयनम् एकासनोपवेशनं चेत्यर्थः । पंक्तितः एकपंक्तिभोजनं पातकिनो यागे आर्त्विज्यम् । अध्यापनं पातकिनः सावित्र्यध्यापनं योनिः योनिसंबंधः स च पातकिन्याः

स्त्रिया विवाहो गमनं च पुरुषस्य पापिपुरुषस्य गमनं विवाहश्च स्त्रियाः । सहभोजनं पापिना एकपात्रे भोजनम् । अत्र एकशय्यादिपंचानां संवत्सरेण पातकिसमत्वकारकत्वं याजनादिचतुर्णां सद्यः पातकिसमत्वकारकत्वं तथा च व्यासः—

यो येन संवसेद्धर्षं सोपि तत्समतामियात् ।

इति देवलः ।

याजनं योनिसंबंधं स्वाध्यायं सहभोजनम् ।
कृत्वा सद्यः पतंत्येते पतितेन न संशयः ॥

इति अत्र पतितपदं पापमात्रान्वितपुरुषपरं तेन यादृशपापिसंसर्गं यः करोति तादृशपापिसमो वर्षेण सद्यो वा स भवतीत्यर्थः । अत्र देवलवचने स्वाध्यायश्च उपनयनकालोनसावित्रीपाठः स येन महापातकिगुरुमुखात् कृतः स महापापतकी योनि संबधः महापातकिना पुरुषेण स्त्रिया वा समागमः । महापातकिना परिणीता कन्यापि महापातकिनी (महापातकिनी वा कन्या येन परिणीता सोपि महापातकी) तिभवदेवः

देवलः

आलापस्पर्शनिःश्वासात् सहयानात्सहासनात
याजनाध्यापनाद्यौनात्पापं संक्रमते नृणाम् ॥

आलापोऽन्योन्यसंकथनम्। आसनमेकासनोपवेसनम् याजनादिकं पूर्वमेव व्याख्यातम्। आलापादिषण्णां निरन्तरसम्वत्सरेण पातकिसमत्वकारकत्वं [यो येने] तिप्रागुक्तव्यासवाक्यात।

अथ प्रायश्चित्तम् ॥

यत्पापिनो यत्प्रायश्चित्तं निरन्तरसम्वत्सरपर्यंतं तत्पापिसंसर्गिणः पादोनं तदेव प्रायश्चित्तम् ॥

यो येन संवसेद्धर्षं सोपि तत्समतामियात्
पादन्यूनं चरेत्सोपि इतिव्यासवचनात् ॥

यत्पापिनो यत्प्रायश्चित्तं निरंतरं षण्मासपर्यंतं तत्पापिसंसर्गिणः तत्प्रायश्चित्तार्द्धम्।

षण्मासिके तु संयोगे याजनाध्यापनादिना।
एकत्रासनशय्याभिः प्रायश्चित्तार्द्धमर्हति।

इति वृहद्वृहस्पतिवचनात् ॥ याजनाध्यापनयो-रादिः याजनाध्यापनादिः तेन याजनादिपूर्ववृहद्-वृहस्पत्युपात्त एकशय्यासनादिपरिग्रहः ।' [अत्रै-वं निरन्तरमासत्रयसंसर्गे प्रायश्चित्तपाद इत्याद्यू-हनीयमिति] गोपालः ॥ एतच्च सप्तानामेव समुच्चितानां सम्वत्सरपर्यन्तं निरन्तरमेवानु-ष्ठितानां पातकहेतुत्वम् । अंतराव्याये तूद्-धृत्य वत्सरादिसंकलना कर्त्तव्या । [अन्यतरा-पाये च भागशः प्रायश्चित्तव्यवस्थोहनीये) तिभव-देवः ॥ एतत्पादन्यूनार्द्धादिकं प्रथमसंसर्गिणः प्राय-श्चित्तम् । द्वितीयसंगर्गिणस्तु प्रथमसंसर्गिप्रायश्च-त्तार्द्धं तृतीयसंसर्गिणस्तु प्रथमसंसर्गिप्रायश्चित्त-पादं प्रायश्चित्तं अन्त्यजातिसहवासे चान्द्रायणप्राय-श्चित्तमभिधाय ।

यैस्तत्र भुक्तं पक्वान्नं कृछ्रन्ते षां विनिर्दिशेत्
तेषामपि च यै र्भुक्तमर्द्धं तेषां विनिर्दिशेत्
तेषामवि च यैर्भुक्तं कृछ्रपादो विधीयते ॥

इत्यापस्तंववचनात् ॥ तथाचान्त्यजसहवासकर्तुः प्रथमसंसर्गिणः कृच्छ्रं द्वितीयसंसर्गिणस्तदर्द्धं तृतीयसंसर्गिणस्ततोप्यर्द्धमिति पर्य्यवसितमेव ॥ चतुर्थसंसर्गिणो न दोषः प्रापकाभावात्। स्मार्त्तोप्येवमेवाह याजनाध्यापनयोनिसंबंध एकपात्रभोजनरूपसंसर्गे एकदिनसंसर्गेणैव मुख्यपापिसमत्वान्मुख्यपापिप्रायश्चितपादोनं प्रायश्चित्तम्। [याजनं योनिसंबंधमित्यादि] [यो येन संवसेद्वर्षमित्यादि] देवलव्यासवचनाभ्याम्॥ [अत्र यद्यपि मरणं पादोनं न संभवति तथापि मरणवैकल्पिकचतुर्विंशतिवार्षिकस्य पादोनं कर्तव्यमि] तिगोपालः। अत्र

यो येन पतितेनैषां संसर्गं याति मानवः
स तस्यैव व्रतं कुर्य्यात्तत्संसर्गविशुद्धये॥

यत्र व्रतोपदेशान्मरणस्य व्रतरूपत्वाभावात्। यद्यपि कामतो महापातकिनो मरणमेव प्रायश्चित्तमुपदिष्टं तथापि तत्संसर्गिणस्तत्तुल्यत्वेपि व्रतरूपमेव तेन कामतो ब्रह्मवधादिमहापातकचतुष्टयेपि यद्व्रतं

द्वादशवार्षिकं तदेव। कामतः संसर्गिणेापि द्रष्टव्यं न तु पंचमस्य संसर्गिणेापि मरणांतिकं तदुक्तं स्वल्पयमेन—

महापातककर्त्तारश्चत्वारो वा विशेषतः

अग्निप्रविश्य शुद्ध्यंति स्नात्वा वा महति क्रतौ इतिभवदेवः ॥ महापातककर्तारः ब्रह्महासुरापिस्तेयिगुर्वंगनागामिनः। अविशेषत इति एषु विशेषो नास्तीत्यर्थः ॥

इतिसच्छाब्दिकश्रीमानिकशर्म्मात्मजमहामहोपाध्याय श्रीअमृतनाथशर्म्मकृत सारसमुच्चयार्णवे प्रायश्चित्तव्यवस्थासारसमुच्चयः समाप्तः ॥

पूर्णे धीरेन्द्रवृन्दै र्वरचयनपुरे वासवान् भूमिदेवः।
कीर्त्तिप्रख्यात आसीदमृतपदलसन्नाथनामाबुधेन्द्रः ॥
तर्काब्धेः पारगन्ता सकलगुणयुतो निर्म्मिता तेन सम्यक्
प्रायश्चित्तव्यवस्था सकलबुधजनस्वान्तसन्तोषदाची ॥१॥

अस्मत्प्रकाशितपुस्तकानाम्—

संक्षिप्तसूचीपत्रम् ।



अमरकोश—शब्दानुक्रम सहित	मूल्य	।।।)
अमरकोश—मूलमात्र	,,	।=)
,, —प्रथमकाण्ड...	,,	=)
अहिबलचक्र—रबदा नामिका सान्वय भा० टी० ...	,,	=)
अद्वैतामृतम्...	,,	॥=)
अद्वैतसंग्रह	,,	।।।)
ग्रहप्रयोग (ग्रहशान्ति)—पं० वायुनंदन अग्निहोत्रि निर्मित	,,	॥)
जातकालंकार—संस्कृत टीका तथा भाषा टीका संयुक्त ...	,,	।=)
पद्मकोश—विकाशिकानामिका भाषा टीका	,,	।)
पुरुषसूक्त, श्रीसूक्त लक्ष्मीसूक्तञ्च	,,	)
बृहज्जातक—सोदाहरण भाषा टीका रफ कागज	,,	२)
,, — ,, ,, रंगीन	,,	२॥)
महिम्नस्तोत्र—मधुसूदनी तात्पर्य व्याख्या सहित	,,	॥)
लघुपाराशरी—मनोरंजनी नामिका सान्वय भाषा टीका	,,	।=)
विवाहपद्धति—पं० वायुनन्दन अग्निहोत्रिनिर्मित ...	,,	=)
विवाह वृन्दावन—सान्वय भाषा टीका	,,	१॥)
विष्णुसहस्रनामावली	,,	=)
षट्पंचाशिका—संस्कृत तथा भाषा टीका सहित ...	,,	।=)
साङ्ग प्रणवकल्प	,,	=)
शिवसहस्रनामावली	,,	=)
हनुमान बाहुक	,,	)

पुस्तकप्राप्तिस्थानम्—

मास्टर खेलाड़ीलाल संस्कृत बुकडीपो,

कचौड़ी गली, बनारस सिटी ।